பொருக்கவே சொல்லுகிருய் வெங்காட்டு நங்கைநீ
ஒருக்காலே கொண்டுவந்து படையுமென்ருர்

அப்படியே வெங்காட்டு நங்கை தானும்
அன்பாகக் கொண்டுவந்து படைப்பாளாம்

காணுத வகையெல்லாம் காணுகிற—இரு
கண்ணிமுழி யிங்கே காணேமென்ருர்

கேளாத இன்பமெல்லாம் கேழ்க்கிறது—இரு
காதுசெவி தானுமிங்கே காணேமென்ருர்

தம்பிரானுர் கையிலெடுத் தகப்ப டாதத்
தலைக்கறி காணேமென் றெழுந்திருந்தார்

இதோவல்லோ யிருக்கு தலைக்கறிதா—னென்று
எடுத்தோடி வருவாளாஞ் சந்தனநங்கை

என்றபோதே அய்ய ரிருந்தா—ரப்போ
இவளா ரென்றுசொல்லிக் கேழ்ப்பாராம்

எப்போதும் எங்களுக்கு மூப்பு—இவள்
இப்பவல்லோ எங்களுக்கு நாச்சியார்காண்

நாச்சியா ரென்றபோதே அய்யர்—தாமும்
நல்லதொண்ட னுரை யேதுசொல்வார்

பாலகனைக் கொன்றபழி தீர—இப்போ
கூடியுண்ண பாலகன் வேணுமென்ருர்

பாலகன் பள்ளிக்குப் போனுனய்யா—அவன்
பகலைக்கு வருவான் சாப்பிடுங்கள்

வருகிற வேளையாச்சு நீங்களிரு வருமாய்
வாசலிலே போய்நின்று கூப்பிடுங்கோள்

இதுவென்ன சோலியென்று வெளியே வந்து
வெங்காட்டு நங்கையும் தொண்டனும்

சீராளா சீராளா வென்று சொல்லி
தீவிரமாய்க் கூப்பிட்டா ரிருவருமாய்

தண்டையுஞ் சதங்கையும் கலகலென—பிள்ளை
சாஞ்சாடி சாஞ்சாடி வருவானும்

கூட்டிய பலகாய் மணத்திடவே—வீட்டில்
ஓடியே வருவாளும் சீராளனும்
கண்டாரே பிள்ளையை யிருவ ருமாய்க்
காரணமா யிருக்குது யென்றுசொல்லி
ஓடியே பிள்ளைதனை யெடுத்துக் கொண்டு
உச்சியை முகந்துகொண் டணைத்தாராம்
கடுகியே பிள்ளைதனை யெடுத்துக் கொண்டு
அய்யரண்டை ஓடி வருவாராம்
மகனை எடுத்துக் கொண்டுவரச்சே—அய்யர்
மாய மாகிப்போய் விடுவாராம்
அப்போது தொண்டனூர் அய்யரை வந்துபார்த்து
அய்யரைக் காணுமல் தேடுவாராம்
திக்கெல்லாம் ஓடியே தேடி யல்லோ
தேவியும் தானுமாய்ப் புலம்புவராம்
தவசியென் றல்லோ நானிருந்தேன்—நீங்களிப்போ
தம்பிரானுய் வந்ததை யறியாமல்
அறியாமல் போனதிணு லிப்போதே—நான்
அய்யரைத் தீண்டினே னிப்போவென்றுன்
தெரியாமல் தீண்டினே னென்னசெய்வே—னெங்கள்
தேசிகனைத் தீண்டினே னென்னசெய்வேன்
அப்போது தோத்துச்சுச் சிவனென்று
அறியாமல் போனேன் என்னசெய்வேன்
எருதுமேல் வந்தபோதே யீசுவ ரன்தான்
என்றறி யாமல் போனேனே தான்
பேரால் பெரியவனே தம்பிரானே !—நல்ல
பெண்ணுமாணு மானவனே தம்பிரானே !
நீரால் சடையவனே தம்பிரானே !—கூந்தல்
நின்றகொன்றைக் காரனே தம்பிரானே !
தக்கனை தலையறுத்த தம்பிரானே !—நல்ல
கல்லாலெறி பட்டவனே தம்பிரானே !
அக்கினியைக் கையொடித்த தம்பி ரானே !
அரகரா சிவசிவா தம்பிரானே !
கல்லா லெறியுண்ட தம்பிரானே—பார்த்தன்
வில்லா லடிபட்ட தம்பிரானே !

கையா லடிபட்ட தம்பிரானே !—வேடன்
காலா லுதைபட்ட தம்பிரானே !

எப்போது மெங்களுக்கு நாயகரே !—என்னை
எப்படியோ சோதிக்க வந்தீரய்யா !

பொல்லாத நாயடியேன் வீட்டிலேதான்—நீங்கள்
பிட்சாடராகவந்த தறியேனே

கல்லாத நாயடியேன் வீட்டிலேதான்—நீங்கள்
கயிலாச நாதரைப்போல் வந்தீர்காண்

நினைக்கவு மறியேனே பொல்லாதவன்—நான்
நேர்முகமாய்ப் பணியே னுந்தனைத்தான்

பணியவு மறியேன் துதிக்கவுமறியே—னும்மைப்
பாடவு மறியேன் பணியறியேன்

பொய்யேன் செய்த பிழைக ளெல்லாம்
பொறுத்துமனம் சகித்து இந்நேரம்

நாயேனை யாண்டுகொள்ள வந்தாலாச்சு—சுவாமி
நாயகனே வாராவிட்டா லுயிர்விடுவேனே

உயிர்விடு வேனென்று இருவரு மாய்
உறுதியா யிருந்தா ராத்தியின்கீழ்

ஆத்தி யடியிலே போயல்லவோ—நல்ல
அன்பான தொண்டரும் மனைவியுமாய்

ஆதியே சோதியே உமக்கே பழி
அய்யனே மெய்யனே உமக்கேபழி

உமக்கே பழியென்று தொண்டனும் தேவியும்
உறுதியாய்ச் சூரியைக் கையிற்கொண்டு

கழுத்தைச் சூரியால் அறுக்கவல் லோதான்
கயிலாச நாதரும் வருவாராம்

பூமாரி பொன்மாரி பொழியவே தான்
பொன்னம் பலவரும் வருவாராம்

சாம்பிராணி வாடை மணக்கவேதான்—நல்ல
தையலுமைப் பாகரவரும் வருவாராம்

வல்லானை யறுக்கத் துரையனுந்தான்—வெள்ளை
எருதுமே லேறி வருவாராம்

அன்னத் தின்மே லேறிபார் வதியும்
அன்பாக யிங்கே வருவாராம்

பெருச்சாளி மேலேறி யேதான்—நல்ல
பிள்ளையா ருமங்கே வருவாராம்

வேலவர் மயிலேறி யேதான்—நல்ல
வேடிக்கை யாகவே வருவாராம்

முப்பத்தி முக்கோடி தேவர்களும்—நல்ல
நாற்பத்தெண் ணுயிரம் ரிஷிகளும்

இத்தனை பேர்களும் வந்தாரே—அய்யர்
ஏகாம்பர நாதரும் வந்தாரே

கண்டான் சிறுத்தொண்டன் கண்டானே
கயிலாச நாதரைக் கண்டானே

கழுத்தை யறுக்கின்ற கத்தியுந்தான்—அவன்
கைநழுவிக் கீழே விழுந்திடுமாம்

கைநழுவிக் கீழே விழுந்த கத்தி
போயிடு மாம்சிவ னருளாலே

அப்போ சிவனை சிறுத்தொண்டன்—வந்து
அன்பாகத் தோத்திரம் பண்ணுவானும்

கங்கையைத் தரித்தவா போற்றிபோற்றி!—நல்ல
கரிதனை யுரித்தவரே போற்றிபோற்றி

திங்களைத் தரித்தவரே போற்றிபோற்றி!—நல்ல
சேஷனைத் தரித்தவரே போற்றிபோற்றி!

மங்கையுமை பங்காளா போற்றி போற்றி!
வளர்சடை முடியானே போற்றிபோற்றி!

அங்கியைக் கரத்தில்வைத்தாய் போற்றி போற்றி!
அரகரா சிவசிவா போற்றிபோற்றி!

தோத்திரம் பண்ணுகிற தொண்டனுரைப்—பார்த்து
சொல்லுவார் தம்பிரானு ரப்போதுதான்

வேணுமென்ற வரங்கள் நாம்கொடுப்போம்—தொண்டரே
வேணுமென்ற வரங்கள் கேளுமென்ருர்

அந்நாளில் என்னையிப்படிச் செய்யச் சொன்ன
அன்பான காடவர்கோன் ராசனுந்தான்

செல்லும் பதமளிக்க வேணு மென்று
சிவனுர் பாதத்தில் விழுந்தனரே

பாதத்தில் விழுந்த தொண்டனுரைப்—பார்த்து
பரம சிவன்தான் ஏதுசொல்வான்

இப்போது தொண்டனாரே ஆத்தியின்கீழ்—நமக்
இன்பமுடன் ஆலயமு முண்டுபண்ணி

மெய்யாக நமக்குநீர் செய்தபடி—நன்றாய்
வெகுமதி யாயவன் செய்வித்தால்

இன்றைக் கிருபத்து ஓராம்நாள்—அவனுக்கு
இசையும் படிவரம் கொடுப்போமென்றார்

அப்படியே அவனுக்குக் கொடுக்கிறோம்தொண்டா—வுனக்
கன்பான வரங்களைக் கேளுமென்றார்

இப்பொழுது கண்ட காட்சியைப்போல—சுவாமி
எப்பொழுதுங் காணவரந் தருகவென்றார்

இருகண்ணாலே இப்பொழுது கண்டகாட்சி—போல
ஒருநாளும் பிசகாமல் காணவேணும்

எந்நாளு மிப்படி கண்டுகொண்டு—சுவாமி
இருக்க வேவரந் தாருமென்றார்

அப்படி யேசிவ னார்மகிழ்ந்து—தொண்டரை
அறுபத்து மூவரி லமைத்தாராம்

சிறுத்தொண்டன் மனைவிக்கும் சீராள னுக்கும்
சிவகாமி கயிலர்ச மளித்தனராம்

சந்தனநங் கைக்குத் தானல்லவோ—சுவாமி
தயவான பதங்களைக் கொடுத்தாராம்

எந்நாளும் ஏவல்பணி செய்கின்ற—சிவ
சங்கர பதங்களைப் பெற்றனராம்

அண்டைவீ டசல்வீடு பக்க சனத்திற்கு
அன்பாக யேழுக மாகவேதான்

பக்கத்துக் கேழுக மாக வேதான்
பதினுலகமுஞ் சொர்க்கலோகமும் பெற்றனராம்

அன்பான சிறுத்தொண்டன் சிந்து தன்னை
ஆரொருத்தர் படித்தாலும் கேட்டாலும்

இன்பமு டன்சிறுத் தொண்டனைப் போல
எந்நாளும் கயிலாசம் பெற்று வாழ்வார்.

முற்றும்.

—o—

# NAYATATTVASAṄGRAHA

Edited by

**Sri T. CHANDRASEKHARAN, M. A., L. T.**

*Nayatattvasaṅgraha* is a very rare and important work in the field of the Prābhākara School of Mīmāṁsā, hitherto unknown to the public. Its author is stated as one Viṣṇu Bhaṭṭa who may be indentified with Sarvajña Viṣṇu Bhaṭṭa, the author of Ṛjuvivaraṇa, as, apart from the indentity of name and antiquity of style, writing in the form of combined prose and poetry is adopted in both the works. Sarvajñaviṣṇubhaṭṭa, who is said to be the son of Janārdana (Afterwards Ānandagiri) belongs to the 14th Century.

In Nayatattvasaṅgraha the author explains all the topics of the Tarkapāda in the manner adopted by Prabhākara and his followers. As such he has to condemn all the epistemological topics accepted by Kumārila Bhaṭṭa and explain the Prābhākara tenets in the system. Though the Mīmāṁsā system does not accept a personal God (Īs'vara) all the authors right from Kumārila, Prabhākara and Bhavanātha have condemned the *anumāna* advocated by the Naiyāyikas on the establishment of Īsvara, but they have no objection in accepting Him on the evidence of Smṛti texts. Kumārila pays homage to Lord Śiva in the first verse of his Ślokavārtika. Bhavanātha[1] says in his Nayaviveka (P. 199) एवं ईश्वरे अनुमानं निरस्तं नेश्वरोऽपि निरस्तः, thus accepting Īs'vara on the strength of Sruti, following the Brahma Sūtra शास्त्रयोनित्वात् (1-1-3)

Our author following Bhavanātha says "अस्त्वेवमीश्वरसिद्धिः। का नो हानिः—अभ्युपगम्यत एव वैदिकेश्वरः। तस्मात्सिद्धोऽवैदिकेश्वरनिरासः।

This edition of the work is based upon a paper manuscript bearing No. R. 3277 and a Palmleaf manuscript bearing D. No. 16279 in Malayālam script preserved in this library. Some of the mistakes had to be corrected on the presumption of the possibility of the correct readings as suggested and incorporated in the text. The readings from the Palm leaf manuscript are given separately at the end.

---

1. विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥
Ślokavārtika (1-1-1)

The various topics dealt with in this work are given below:—

1. अध्ययनविधिः ।
   अध्ययनस्य अर्थज्ञानप्रयुक्तत्वमते मीमांसा न युक्ता ।
2. वेदस्य कार्यार्थता, कार्ये व्युत्पत्तिः, न सिद्धे ।
3. कार्यताज्ञानं प्रवर्तकं, नतु इष्टसाधनताज्ञानम् ।
4. स्वतः प्रामाण्यम् ।
5. श्येनादेः अधर्मत्वोपपादनम् ।
6. भट्टीयप्रमाणलक्षणखण्डनम् ।
7. अनुभूतिः प्रमेति स्वमतम् ।
8. मनोविभुत्वखण्डनम् ।
9. योगरूढिखण्डनम् ।
10. इन्द्रियाणां अप्राप्यकारित्वसाधनम् ।
11. अन्यथाख्यातिखण्डनम् ।
12. सत्ताजातिखण्डनम् ।
13. भेदाभेदखण्डनम् ।
14. समवायव्यवस्थापनम् ।
15. निरालम्बनवादखण्डनम् ।
16. शून्यवादखण्डनम् ।
17. ज्ञानस्वप्रकाशत्वम् ।
18. प्राकट्यखण्डनम् ।
19. व्याप्तिनिरूपणम् ।
20. कर्मणः अप्रत्यक्षत्वम् ।
21. शक्तिस्थापनम् ।
22. अर्थापत्तिः अर्थाध्याहारः ।
23. अभावखण्डनम् ।
24. ईश्वरखण्डनम् ।
25. शब्दगुणत्वसाधनम् ।
26. शब्दनित्यत्वसाधनम् ।
27. अन्वितशक्तिः ।
28. अपौरुषेयत्वम् ।
29. प्रपञ्चमिथ्यात्वखण्डनम् ।
30. आत्माभेदनिरासः ।

My thanks are due to Sri S. Subrahmanya Sastri, Reader in Sanskrit, University of Madras, in rendering me invaluable help in editing this work.

|| श्रीः ||

# || नयतत्त्वसङ्ग्रहः ||

सत्यानन्दप्रकाशः श्रुतिशिरसि लसद्व्यापनाद्यो हि विष्णुः
यस्य श्रीः स्वप्रकाशप्रकटितमहिमा बाह्यबोधार्थशक्तिः ।
[1]मायाद्यु[ह्यु]त्पत्तिशक्तिः प्रकृतिरथ महान् निश्चयो योऽभिमानः
[2]साहंकारायदंशाः सकलनरभिदा विष्णुमेनं[3] नमामि ॥

अरूपमपि यद्रूपं नीलोत्पलदलच्छवि ।
विभाति व्योमवत्तस्मै परस्मै विष्णवे नमः ॥ २ ॥

**। अर्थज्ञानार्थं अध्ययननियमविधिरिति भट्टमतखण्डनम् ।**

**॥ अथातो धर्मजिज्ञासा ॥**

स्तुतिरूपोपकारार्थमर्थवादातिदेशनात् ।
भावयेत्तद्व्रतश्चेष्टं वेदाध्ययनभावना ॥ ३ ॥

तस्मात्स्वर्गस्य भाव्यत्वं पूर्वपक्षे न सम्भवि ।
राद्धान्ते त्वर्थबोधस्य भाव्यत्वे तद्विधिर्वृथा ॥ ४ ॥

ननु नियमार्थत्वात् न विध्यानर्थक्यम् । न । मानान्तरविरोधपौनरुक्त्याभ्यां न स्वरूपनियमसम्भवः । नाप्यवघातस्य यथाऽपूर्वसाधनत्वस्याप्राप्तस्य विधाने नियमः फलं भवति तथा क्रतौ नियमः सम्भवति अक्रत्वर्थत्वादध्ययनस्य ।

नन्वन्वयव्यतिरेकाभ्यामनुमानेनाध्ययनस्यार्थबोधहेतुत्वावगतेः पूर्वमेव विधिः तत्साधनत्वं बोधयन् अप्राप्तविधिरेव पश्चात्तत्रानुमानाप्रवृत्तेर्न भाविन्यपि [4]प्रवृत्तिरस्ति । अथापि विध्यभावेऽपि प्राप्तौ भविष्यन्त्यां किं विधिनेति प्रयोजना[5]पेक्षायां क्रत्वधिकारोपसंहारः प्रयोजनं कल्प्यते । तथाप्यध्ययनविधिलब्ध[6]विद्या तदपेक्षिणा क्रतुविधिनोपजीव्यत इति न शूद्रस्य विद्याप्रयुक्त्यभावात् क्रतुष्वधिकारोऽस्तीति न व्यर्थं विधानमिति चेत्; स्यादेतदेवं

यद्यत्रानुमानादग्रेसरं शास्त्रमभविष्यत्; अत्र त्वर्थज्ञानमध्ययनेन साधयेदिति [1]शब्दोऽस्ति किन्तु अन्वयव्यतिरेकाधीनमर्थज्ञान[2]विधिना स्वीक्रियते तस्मात् विधिवैयर्थ्यं तदवस्थमेव।

अथवा पाक्षिकी प्राप्तिर्न नियमविधिं विहन्तीति चेन्न; शास्त्रगम्यस्य साधनत्वस्य नित्यमेव प्राप्तत्वात्।

अथ साधनान्तरप्रयुक्तिसमयेऽर्थज्ञानार्थमध्ययनप्रयोगस्याप्राप्तस्य विधिरिति चेन्न; विधानस्य पाक्षिकत्वप्रसङ्गात्, विध्यनुवाद[3][ा]वैषम्यप्रसङ्गात् क्रतुविधिस्वीकारपाक्षिकत्वप्रसङ्गाच्च।

अथ द्रव्यार्जननियमवदत्रापि नियमः सम्भवतीति चेत्; मैवं, न तत्रार्थार्जनं विधिसाध्यं किन्तु द्रव्यार्जनप्रवृत्तिविशिष्टस्य प्रतिग्रहविषयो नियोगश्चोद्यते तदकरणे विध्यतिक्रमात् प्रत्यवायप्रसङ्गादन्योपायनिवृत्तिरर्थाद्भवतीति नियमविधिरित्युच्यते।

अत्रापि तथार्थज्ञाने प्रवृत्तस्याध्ययनविषयश्चेत् नियोगश्चोद्यते तदान्यपरत्वादविवक्षितार्थता स्यात् अन्यपरादपि प्रतिग्रहाद्द्रव्यसिद्धिरविरुद्धा इहान्यपरत्वेऽर्थविवक्षा न स्यात्। [4]अर्थाभिधाया अनन्यपरत्वादर्थबोधोऽस्तीति चेन्न; उच्चारणस्यान्यपरत्वेऽर्थ[5]प्रतीते[ति] र्ज्ञाताप्यविवक्षिता—यथास्ति चत्वरे चैत्र इति। बालक लिख्यतामित्यत्रार्थप्रतीतिर्नास्तीति। किञ्च—रागप्रवृत्तिविषयत्वे प्रतिग्रहवदनित्यत्वं स्यात्; क्रतुप्रवृत्तिविषयत्वे शूद्राधिकारो दुर्वारः तस्मात्प्रतिग्रहनियमसाम्यं नास्तीति।

अथ ज्ञातस्य पुनर्विधाने प्रयोजनापेक्षायामकरणान्यकरणजन्यप्रत्यवायपरिहारः प्रयोजनं कल्प्यत इति चेत्; न अन्यपरत्वप्रसङ्गेनार्थाविवक्षाप्रसाङ्गात्। न च दृष्टत्वादर्थबोधस्यापि भाव्यतेति वाच्यं तात्पर्यानिश्चयाद्दृष्टत्वस्यैव सन्देहात्[6] दृष्टत्वास्वीकारे हिरण्यं भार्यमित्यत्रापि हिरण्यजन्यशोभादेरपि भाव्यत्वप्रसङ्गः।

किञ्च प्रत्यवायपरिहारार्थत्वे उपात्तदुरितक्षयार्थत्वे वा अग्निहोत्रादिवत्प्रधानकर्मत्वापत्तेर्न स्वाध्यायस्य साध्यत्वं स्यात्। नचाध्ययनाधीनस्वाध्यायाद्वा तत्साध्यार्थज्ञानाद्वा प्रत्यवायपरिहार इति वाच्यं तस्याविधिविषयत्वात्।

तस्मात् नियमस्य प्रत्यवायपरिहारः फलमिति न सम्भवति। अवघातनियमादृष्टं तु तत्साध्यतण्डुलव्यक्तेरेवापूर्वसाधनयोग्यत्वमिति न पृथक् साध्यम्। तस्मात् न तत्र साध्यद्वयमस्ति।

अथैवं मतं अर्थज्ञानस्य स्वाध्यायसाध्यत्वं न प्रमाणान्तरावगतं तात्पर्यस्याज्ञातत्वाद्यदा विधिरेव स्वाध्यायसामर्थ्याधीनमर्थज्ञानं भाव्यतया स्वीकरोति तदा तात्पर्यमपि निश्चीयते तस्मादर्थज्ञानशेषत्वं स्वाध्यायस्य सिद्धमिति— उच्यते—स्वाध्यायेनार्थं जानीयादिति विधिर्न सम्भवति क्वचिदनर्थपराणामप्यक्षराणां दर्शनात् तस्मात् नियमविधानासम्भवाद्विधिवैयर्थ्यं सिद्धम्।

अथाध्ययनव्याप्यत्वमर्थज्ञानस्य नावगतमिति नियमरूपव्याप्तिविधानमिति चेत्; न, सामान्यस्य व्याप्यत्वं प्रमाणविरुद्धं विशेषस्य व्याप्यत्वं ज्ञातमेव न विध्यर्हम्। तस्मादध्ययनस्यान्यार्थत्वेनार्थविवक्षा विध्यविषयत्वादेव नार्थज्ञानात्फलान्तरं सम्भवतीति सिद्धम्।

स्वाध्यायस्योपयोगित्वात्साध्यत्वावगतेस्तथा।
तस्यैव भाव्यता युक्ता चित्रेष्टौ पशुभाव्यवत्॥ ५॥

न हि तत्र पयोदोहो विधिसाध्यस्तथार्थधीः।
प्रयोज्या विधिना तेन मीमांसा न प्रयुज्यते॥६॥

। आचार्यत्वफलकाध्यापनविधिपक्षसमर्थनम्।

आचार्यत्वमलौकिकं विधिफलं तस्योपनीतिर्विधे-
रङ्गञ्चाध्ययनं ह्युपेतविहितं द्वारं विधिस्वीकृतम्।
तत्साङ्गाध्ययनप्रयुक्तिबलतः सोऽपि प्रयुक्तो विधिः
तस्यापीश्वरकाङ्क्षिणो विधितया ह्यर्थज्ञ एवेश्वरः॥ ७॥

नन्वाचार्यत्वमलौकिकं न भवति लोकसिद्धाध्यापकार्थत्वात्; यद्यपि विहितानेकनियमपूर्वकाध्यापनकर्तर्याचार्यपदप्रयोगः, यद्यपि च नियमानां दृष्टस्वरूपानुपयोगित्वं, तथापि तत्क्रियाकलापकर्तृत्वमेवाचार्यत्वं नाधिकं किञ्चित् तच्च पाचकमीमांसकादिवल्लौकिकमेव—अत्रोच्यते—न क्रियाकलापकर्तृत्वमाचार्यत्वमनेकार्थत्वप्रसङ्गात्। न च पाचकादिवदेकोपाधिपरिगृहीतत्वं

व्यापारनिचयस्य सम्भवति, अध्ययननियोगहेतुत्वस्य माणवकव्यापारस्यापि तुल्यत्वात् नोपाधिता ।

अथ प्रयोजकव्यापारत्वमुपाधिरिति चेत्—न, उपाध्यायव्यापारस्यापि प्रसङ्गात् । अध्ययननियोगार्थपुरुषान्तरविहितव्यापारनिचयकर्तृत्व-उपाधौ गौरवं बहुदृष्टोपाधिकत्वञ्च स्यात् ।

किञ्चोक्तोपाधेः प्रत्येकप्रवृत्तित्वात्प्रत्येकं व्यापारकर्तृत्वमाचार्यत्वं स्यात्; पुरुषस्योपाधिविशेषणत्वमुपाधिविशेष्यत्वञ्चापद्यते ।

किञ्चातीतेऽपि कर्तृत्वे 'आचार्याय वरो देय' इत्यत्र प्रयोगदर्शनात्तदनुगतमेव रूपं वाच्यम् । नन्वध्ययनसमय आचार्यपदप्रयोगस्यावश्यं लक्षणाङ्गीकार्या तद्वरं भूतलक्षणेति । मैवं, घटं करोतीत्यादौ साधनसमये साध्यवाचिनो निरूढलक्षणादर्शनात् भूतलक्षणा न युक्ता ।

किञ्च प्रयोजकव्यापारनिचयस्याध्ययननियोगार्थत्वे प्रमाणं नास्ति । इदमेव यूपादिष्वलौकिकार्थत्वे प्रमाणं यदाचार्यपदस्योक्तम् । न च तत्र केवलं साध्यत्वं प्रमाणं पुरोडाशादिष्वपि प्रसङ्गात् । तस्मादाचार्यत्वमलौकिकं सिद्धं तत्र वरादिलिप्सया तदर्थप्रवृत्तिसंभवात् अज्ञातोपायत्वाच्च विध्यपेक्षायां स्मार्तस्तावद्विधिः—

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ ८ ॥ इति ।

तत्रान्यतोऽ(पि)प्रसिद्धत्वाद्विधिप्रसिद्धमर्थमेवानुवदति यच्छब्दः । वर्तमानापदेशोऽपि विधिमूल एव । अत[1] एवोपनीयाध्यापनेनाचार्यकं भावयेदिति स्मार्तो विधिरस्ति । ननु द्रव्यार्जनविधिसिद्धत्वादध्यापनस्य न विधेयत्वसम्भवः । मैवं; शिष्योपास्यताद्यर्थमाचार्यबुभूषाधिकारस्याप्राप्तत्वात् ।

किञ्च प्रमाणान्तरावगतबहूपायेषु प्रवृत्तस्याधिकारान्तरचोदनैषा न तु धनसाधनविधिः । धनसाधनत्वञ्च वरदानादिचोदनासिद्धमिति नान्यतः प्राप्तिरस्ति । नचान्नाद्यकामं याजयेदितिवत्प्रयोज्यव्यापारविधिरिति वाच्यं, प्रयोजकव्यापारस्यैव साधिकारत्वात् । उभयोरनधिकारत्वे क्लृप्तदक्षिणादिलोभेन याजनस्य प्राप्तत्वात्तदनुवादो युक्तः ।

श्रौतो वाऽऽचार्यकरणविधिः 'अष्टवर्षं ब्राह्मणमुपनयीत' 'तमध्यापयेत्' इति श्रुतेः। अत्र क्रियाफलस्योपनयनसंस्कारस्य कर्मगतत्वात्स्वरित-[1] सूत्रेणात्मनेपदस्याप्राप्तत्वात् [2]संमाननसूत्रेणाचार्यके प्रयोजनफले नयतेरात्मनेपदं विधीयते। कारकावस्थायां क्रियाजन्यमीप्सितञ्च क्रियाफलमित्युच्यते। तस्य कर्तृगतत्वे वा कर्मगतस्यापि कर्तृसाधारण्येऽपि[1] स्वरितञित्सूत्रम्[1]। आधानफलञ्चादृष्टमात्मगतमग्निप्रतियोगिकं वाग्निगतमात्म[2]साधारणं वा भवतीत्युपपद्यते आत्मनेपदम्। उपनयनसंस्कारस्तु माणवकस्याप्युपयोगीति न तत्कर्तृगामीत्युच्यते। यत्त्वध्यापयेदिति परस्मैपदं तद्बुधयुधादिना विहितम्। अचित्तवत्क[3]र्तृगतत्वञ्चाकर्मकविषयम्। तस्मात्सिद्धो विधिः। परपक्षेप्यदृष्टोपाधित्वात् न विधिविरोधः। श्रौते तावदात्मनेपदादाचार्यकस्य साध्यत्वमवगम्यते। स्मार्तेऽपि "य एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छती"तिवत्साध्यत्वं प्रतीयते। अनन्यलभ्यस्यानुवादोऽपि विधिमूल एव। नचानुवादेऽन्वयभेदो वाक्यभेदकः। तस्मात्साध्यत्वात् नियमापेक्षत्वादलौकिकत्वेन विधिः सिद्धः। तस्य विधेरुपनयनमङ्गं क्त्वाश्रुत्याङ्गत्वावगतेः।

यद्यपि क्त्वातो बलवती द्वितीया, तथापि तदवगम्यस्य माणवकसंस्कारस्य द्वारत्वेनाविरोधात् नाङ्गत्वहानिः। शेषित्वानर्हत्वाच्च न माणवकस्वरूपेऽङ्गत्वम्। अध्यापनं प्रति अशेषभूतस्यापि माणवकस्य द्वारत्वमविरुद्धं यथर्चां सामद्वारत्वम्। किञ्च द्वितीयातो बलवत्या समानपदश्रुत्याऽऽचार्यकरणाङ्गत्वं प्रतीयते। नचानुनिष्पादि तदिति वाच्यं, प्रत्ययार्थत्वादन्तरङ्गत्वाच्च तस्यैव प्राधान्यात्। तथाहि—पुत्रादप्यभ्यर्हितेनेहामुत्र चोपयोगिनाऽऽत्मनः स्वकुलस्य चोपयोगिना शिष्येण सम्बन्धं को नु नेच्छेत्। इच्छन्नपि वा तदुपायं दृष्टमदृष्टं वाऽऽचार्यकं न सिषाधयिषति। साधयन्नपि वा तदुपायमध्यापनव्यापारं कः परार्थीकुर्यात्। तस्मादुपनयनमध्यापनाङ्गं परार्थमुपनीतोऽपि माणवकः स्वकार्योपयोगिसंस्कारभाग्भवति—यथा ब्रह्मवर्चसाद्यर्थमाधानादिसाधितो वै(द्युता)[ताना]ग्निः संस्कृतो भवति।

---

१. स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा. 1-iii-72).

२. सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा. 1-iii-36).

३. बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (पा. 1-iii-86).

यदा परप्रयुक्तिर्नास्ति तदा कार्यान्तरमेवोपनयनं प्रयुङ्क्त इति नानित्यता संस्कारस्य। नापि प्रयोगापवर्गिता उत्तरत्र संस्कारस्यानुवृत्तिदर्शनादुपनयनान्तराश्रुतेश्च। तस्मादुपनयनमध्यापनाङ्गमिति सिद्धम्। तज्जन्यसंस्कारस्योभयोपयोगेऽपि न[1] तस्य तादर्थ्यं विरुद्धमिति सिद्धम्।

अथ कथमध्ययनविधिप्रयुक्तिः? अध्यापनोपयोगादिति चेत्; न, विध्यंशस्यानुपयोगादुच्यते उपनीत्यासन्नस्य माणवकस्य किञ्चित्करा[त्कार्या]पेक्षायामुपनीतिं प्रक्रम्य विहितमध्ययनं तद्द्वारतया स्वीकरोतीति विहितसाङ्गप्रयोगात्तद्विधेरपि प्रयुक्तिसिद्धिः। ननु सामर्थ्यप्राप्तमध्ययनमात्रं विहाय कथं विहिताध्ययनस्य द्वारता उच्यते। अध्ययनविशेषस्य विधिलब्धस्य प्रतीतस्य त्यागासंभवात्। सोऽपि विधिःस्वविषयानुष्ठानमाकाङ्क्षमाणोऽपर्यवसित आस्ते। अत[2]स्तद्विध्यर्थमध्ययनं द्वारतया स्वीक्रियते। अत एवानुष्ठानस्य सिद्धत्वात् न नियोज्याकाङ्क्षा च। न च ब्राह्मणोऽष्टवर्षो वा उपनीतो वा नियोज्यः श्रुतस्तस्यासाध्यविशेषणत्वात् निमित्तश्रुत्यभावाच्च। न च विषयफलस्यार्थज्ञानस्यार्थात् नियोज्यविशेषणत्वं अन्यतो लब्धानुष्ठानस्य न नियोज्यकल्पना। न च कृत्युद्देश्यत्वार्थं नियोज्याकाङ्क्षा यस्य[3] यत्कृतेः साध्यं तदुद्देश्यत्वसंभवात्। न च तन्निरूपणापेक्षा अनिरूप्यमाणमपि कृतिप्रयोजनं भवत्येव यदृच्छया कृतस्य परप्रेरणया वा कृतस्य प्रयोजनत्वदर्शनात्।

ननु कृतिः किमुद्दिश्य प्रवर्तत इति चेन्न—प्रेरकोद्देशादपि तत्सिद्धेः न प्रयोज्योद्देशोपयोगः। प्रयाजादिषु पर[4]प्रयोज्यत्वाभावात् नियोज्योऽस्ति। [5]तथापि नियोज्यान्विताभिधानाभावादनियोज्यकमित्युच्यते।

न च प्रवर्तकत्वार्थं नियोज्यापेक्षा, विषयैश्वर्यबोधादेव प्रवर्तकत्वोपपत्तेः। अत एवाधानादिषु प्रवर्तकता। अत एव परप्रयुक्त्यभावे प्रबुद्धस्याधिकारबोधात् प्रवृत्तिः। प्रवृत्तिविषयकार्यबोधस्यैव प्रवर्तकत्वात्। तस्माद्विधिप्रवृत्तिरस्तीति स्थितम्।

किमर्थं तर्हि अधिकारपर्यवसानं? न तावद्बोधार्थमपेक्षा। नियोज्यान्वयस्यैव बोधोपयोगित्वात्, नाप्यनुष्ठानार्थमपेक्षा, तस्य सिद्धत्वात्। नापि विधित्वार्थं; तस्यानुपपत्त्यभावात्। अथ प्रवृत्तिशक्तियुक्तो विधिः तच्छक्तियुक्त-

त्वञ्च विषयैश्वर्यं, तत एव तत्र प्रवृत्तिदर्शनात् ततोऽधिकारापेक्षेति चेत्; तन्न। कार्यत्वमेव प्रवर्तकत्वशक्तिः न तु तदतिरिक्तं विषयैश्वर्यं प्रवर्तकत्वम्। अथ विधेः पुरुषार्थत्वार्थमपेक्षेति चेत् किमिदं पुरुषार्थत्वं ? न तावत्पुरुषशेषत्वं तस्यासंभवात्। नापि प्रयोजनत्वं तदर्थमप्यधिकारापेक्षत्वाभावात्। तस्मात् नाधिकारपर्यवसानापेक्षा।

उच्यते। विधित्वार्थमधिकारापेक्षा विधिर्हि प्रवर्तकत्वशक्तियुक्तः प्रवर्तकत्वञ्च साक्षात्स्वस्मिन् न संभवतीति स्वसाधनविषयं भवति तत्र विषयं पुरुषो यावत्स्वसमीहितसाधनतया स्वशेषं नावबुध्यते तावत्पुरुषकृतिस्तत्र न भवति। इदमेवाधिकारित्वं यत्पुरुषस्य कर्मणि फलितया शेषित्वमिति तथा पुरुषार्थत्वं विधेः पुरुषप्रयोजनत्वम्। तच्च कृतीप्सितसाध्यत्वं, तदपि विषयद्वारा भवतीति विषयस्य स्वयं प्रयोजनत्वाभावात् फलसाधनतया पुरुषार्थत्वं वाच्यम्। तत्र पुरुषस्य स्वभावाच्छेषित्वेनान्वय इति सिद्धमैश्वर्यपर्यवसानम्।

ननु विधिः साधने स्वसाधनतयैवैश्वर्यमापादयतु न फलान्तरसाधनतयेति तस्मिन्पर्यवसानमिति विचारो न युक्तः। उच्यते—शब्देन वा स्वसामर्थ्येन वा विषयस्वभावेन वा फलान्तरसाधनत्वं यत्रावगतं तत्रास्य प्रयुक्तिलाघवाय तत्साधनतयैवैश्वर्यमापादयति तदसम्भवे स्वसाधनतयेति युक्तो विचारः। किञ्च कस्यचित् क्वचिद्धित,[1] प्रेरको विधिः विहितत्वञ्च कस्यचित्पुरुषस्योपयोगित्वमिति विशेषोपसंहारापेक्षा। अतः क्व[2]चित्पुरुषविशेषं प्रति स्वविषयशेषत्वज्ञापनमधिकारोपसंहारः। तत्र प्राथम्यादाचार्यकोपयोगितया अध्यापकशेषमध्ययनमिति प्राप्तं तत्र—

मुख्यादपि बलीयस्त्वमन्तरङ्गस्य युज्यते।
तस्मादध्ययनेऽध्येता स्वामी नाध्यापको नरः ॥ ९ ॥

ननु विषयस्वभावलभ्यमर्थावबोधं प्रति शेषत्वं न विध्यधीनम्। उच्यते। तात्पर्यस्य सन्दिग्धत्वात् न तच्छेषत्वं सिद्धम्। यदा विधिरधिकारविशेषार्थी विषयसामर्थ्यप्रतीतमर्थबोधं प्रति विषयस्य शेषत्वमापादयति, तदा तात्पर्यमपि सिद्धं भवति। पुरुषस्य फलित्वमपि सिद्धं, श्रुत्याऽपूर्वविषयत्वं, नियोगादर्थज्ञानशेषत्वमिति न साध्यभेददोषः।

ननु सामर्थ्याधीनत्वादर्थबोधं प्रति शेषत्वस्य (सा)[1][अ]ध्ययनस्य पुरुषार्थत्वलक्षणम्, न, सामर्थ्यस्य सामान्यसम्बन्धाभावेनाप्रमाणत्वात्, अत एव फलस्य पुरुषशेषत्वम्। तस्मादर्थज्ञानस्य मीमांसाधीनत्वात्तच्छास्त्रमारम्भणीयमिति सिद्धमिति।

सामान्यशीललब्धस्य व्यक्तिमात्रस्य कस्यचित्।
विशेषनिष्ठतायां तु सा पर्यवसतिर्भवेत् ॥ १० ॥

। इति प्रथमसूत्रं समाप्तम्।

## ॥ चोदना ॥

वेदार्थः कार्यरूपस्तदपि नरकृतेरीप्सितं कार्यमाहुः
सर्वेषां कार्यबोधाद्व्यवहृतिरखिला तत्र सम्बन्धबोधात्।
कार्यार्थोऽतः प्रमाणं श्रुतिरखिलवचोऽप्यर्थसंस्पर्शि लोके
लिङ्गत्वाद्वक्तृबुद्धेर्व्यभिचरति वचोऽलिङ्गके लिङ्गबोधात् ॥ ११ ॥

वेदार्थः श्रेयसो हेतुरर्थानर्थात्मकः क्वचित्।
निषिद्धफलसम्बन्धात्सोऽनर्थः श्यैनिको यथा ॥ १२ ॥

आनन्त्याद्धर्षहेतूनां पारिशेष्यमसंभवि।
पुत्रस्ते जात इत्यत्र न पुत्रोत्पत्तिधीगतिः ॥ १३ ॥

अथ सन्निहितत्वेन कारणं सुतजन्मधीः।
पितुर्मुखविकासस्य तन्न सन्निध्यसंभवात् ॥ १४ ॥

पुरुषे यत्र हर्षाख्यं कार्यं तत्रैव सन्निधिः।
क्लृप्तश्चेत्सुतजन्मार्थबुद्धेस्तत्कारणं भवेत् ॥ १५ ॥

तद्धियः स्वगतत्वाद्धि न क्लृप्तः सन्निधिः परे।
पुत्रजन्मैव क्लृप्तत्वात्परस्मिन् यदि कल्प्यते ॥ १६ ॥

तथा चेत्कारणं तस्यात् मार्गे च हसतां नृणाम्।
अथ तेषां तदुत्पत्तिबोधो नास्तीति चेन्मतम् ॥ १७ ॥

समानमितरस्यापि क्लृप्तबोधकवर्जनात्।
अथ सन्तोषकार्यस्य कारणं किमपीष्यते ॥ १८ ॥

तस्य सामान्यतः शब्दो बोधकः परिकल्प्यते ।
आवापोद्धारभेदेन विशेषविषयो भवेत् ॥ १९ ॥

तत्रापरिमितार्थेषु परिशेषो न सम्भवी ।
प्रियासुखप्रसूत्यादेर्दृष्टस्यापि बहुत्वतः ॥ २० ॥

कदाचिद्ग्रहदोषेण विषादोदयदर्शनात् ।
तद्गुणैरपि हृष्येत तथा शब्दश्रुतेरपि ॥ २१ ॥

विशेषनिश्चयाभावात् न सिद्धे शक्तिनिश्चयः ।
प्रवृत्तिस्तु विशिष्टेऽर्थे सा दृष्टा कार्यबोधकः ॥ २२ ॥

बालेन जातमात्रेण मातुरुत्सङ्गसङ्गिना ।
स्तनपानप्रवृत्तेश्च कार्याधीनत्वनिश्चयात् ॥ २३ ॥

कार्यधीः शब्दजन्या स्यात्तदनन्तरभावतः ।
तस्मात्प्रथमतः शब्दाः व्युत्पद्यन्ते हि कार्यतः ॥ २४ ॥

अनन्तरं प्रसिद्धार्थपदसन्निधिकारिता ।
व्युत्पत्तिः कार्यसम्बन्धे तस्मात्कार्यार्थिता गिराम् ॥ २५ ॥

लाघवादैकरूप्याच्चेदितरान्वितवाचिता ।
नैवं कार्यार्थितात्पर्यं प्रथमावगतत्वतः ॥ २६ ॥

व्युत्पत्तावुपयुक्तत्वाद्व्यापित्वाद्गम्यते गिराम् ।
विशिष्टकार्यगम्यत्वाद्विशिष्टा शक्तिरिष्यते ॥ २७ ॥

लोके सिद्धार्थबोधस्तु लक्षणातो भविष्यति ।
कार्यतः शेषसम्बन्धिसंसर्गान्वितवाचिता ॥ २८ ॥

पदानामैकरूप्येण सर्वत्रैवं व्यवस्थिता ।
प्रधानमीप्सितं कर्म कृतेरस्तु प्रवर्तकम् ।

न तु साध्येष्टहेतुत्वं गौरवाद्व्यवधानतः ॥ १९ ॥

अत्र तावत्कस्य प्रवर्तकत्वमिति [1]परीक्ष्येत—न तावदिष्टसाधनं प्रवर्तकं अतीतादिषु व्यभिचारात् । न च भविष्यदिष्टसाधनं प्रवर्तकं सामुद्रविदाख्याने प्रवृत्त्यदर्शनात् अत्यन्तसुखकरे चन्द्रोदयादौ प्रवृत्त्यदर्शनाच्च । ननु साध्येष्टसाधनं

प्रवर्तकमिति चेन्न कृतिसाध्याकारस्यैव प्रवर्तकत्वात् । तद्रूपस्यापि(स्वे)[खे]दादौ व्यभिचारादिष्टसाधनत्वं विशेषणमिति चेन्न इष्टतत्साधनयोर्दुःखाभावतत्साधनयोश्च कृतिसाध्यत्वप्रतीतिस्तत्साध्यत्वविशेषेप्सितत्वपर्यन्तेति तद्रूपस्याव्यभिचाराद[1]भीप्सितसाध्यत्वं प्रवर्तकमस्तु । ननु साध्यत्वमीप्सितत्वेन वा विशेष्यं इष्टसाधनत्वेन वा को विशेष इति चेन्न लाघवमव्यवधानञ्च विशेषः । तथाहि तव पक्षे इष्टसम्बन्धित्वं कृतिसम्बन्धित्वञ्चेति गौरवं स्यात् । मम पक्षे कृतिसम्बन्धित्वमेवेति लाघवमस्ति कृतीप्सितत्वबुद्ध्यनन्तरं प्रवृत्तेरव्यवधानञ्चास्ति ।

किञ्च कृतीप्सितत्वमेव कार्यत्वं तच्चैकमिति लघुतरत्वमस्ति । ईप्सितत्वञ्च कृत्युद्देश्यत्वं, ननूद्देशो नाम चिकीर्षा सा चोत्पन्ना प्रवर्तिका न तु बोधिका । तस्माच्चिकीर्षापूर्वभाविनः साध्योपायस्यैव प्रवर्तकत्वमिति चेन्न— उद्देश्यत्वं प्राधान्यं प्रयोजनत्वं प्रथमं यन्निरूपिता कृतिः यत्प्रवणारम्भाच्चिकीर्षाविषयो भवति तदेव प्रवर्तकं, तत्र कृतिस्वरूपस्य किञ्चित्प्रति प्रावण्यं प्रत्यक्षेणावगम्य तस्य च साध्यत्वमनुमानादवगम्य तज्जातीयव्यक्त्यन्तरे कार्यतां स्मृत्वा प्रवर्ततेऽतः सिद्धं कार्यस्यैव प्रवर्तकत्वम् । ननु [2]साध्य[समी]हितसाधनबोधादेव चिकीर्षोत्पद्यते नान्यकार्यबोधात् । उद्देशश्चे[3]प्सेच्छैव, नान्योऽतः कृतिधर्मोऽस्ति प्राधान्यञ्च तदुद्देशप्रवृत्तकृतिं प्रति सम्बन्धार्हत्वम् । तच्च न प्रत्यक्षार्ह[4]त्वम् । न च मनसस्तत्र प्राभवमस्ति । न च तत्प्रतियोगिनि कृतिधर्मे गुणरूपे मनसः प्रवृत्तिः संयुक्तसमवेतसमवायाभावात् । नापि प्रयोजनत्वमिष्टत्वातिरेकेण सुखादिस्वरूपातिरेकेण वास्ति । तस्मात्तत्स्वरूपप्रमाणयोर्दुर्निरूपत्वात्कार्यं नाम न किञ्चिदस्ति कुतो लाघवाव्यवधाने ? उच्यते—चिकीर्षा हि कृतीच्छा । सा च कृति[5]निरूप्या प्रत्यक्षा भवति । न हि तन्निरूप्यत्वमिच्छासमवेतो धर्मः येन सन्निकर्षान्तरं कल्प्येत । निरूपकाधीननिरूपणरूपबुद्धिविषयत्वं निरूप्यत्वम् । तच्च विषयत्वं[6] प्रकाशमानत्वम् । न च प्रकाशो विषयगतोऽस्ति । तद्गतत्वे(ऽपि) [हि] व्यवहारे न तत्प्रकाशापेक्षा । अतो न सन्निकर्षान्तरं कल्प्यम् । तथा कृतिरपि इच्छा[7]योगिनी य (म)त्रेच्छा तद्विषया निरूप्यते । न तु पुनरिष्टविषया । इच्छायोग्यस्वरूपस्यैव प्रयोजकत्वम् । अत एवाज्ञायमानमपि प्रयोजनं भवति प्रातिकूल्यप्रतियोगिभावाभावरूपयोः सुखदुःखाभावयोस्तत्साधनयोश्च प्रयोजनत्वम् । तत्रैवेच्छा । तद्विषया कृतिः

कार्यकृतिः। यद्यपि कृतेरनिष्टमपि साध्यमस्ति शुष्कप्रवृत्ताया इव कृतेः कर्दमपातः तथापि न तज्ज्ञानपूर्वकं कृतिनिरूपणं तत्साध्यत्वस्यानुमेयत्वात्तस्मात् प्रयोजनकृतिः कार्यकृतिः। सैव प्रवर्तिका च[1] सुखस्य कार्यत्वं स्वस्मिन्न प्रवर्तकं तस्य प्रवृत्त्यविषयत्वादिति वाच्यं—यतस्तत्प्रवृत्तेःसाधनप्रवृत्तित्वात्। यथारुण्यस्य साधनावच्छेदद्वारेण कारकत्वं यथाऽवयवपर्यन्तत्वात् साधनत्वस्य तत्प्रवृत्तिरेव साधनप्रवृत्तिः—यथा जातिव्यवहारः स्वावच्छिन्नायां व्यक्तौ तथा फलप्रवृत्तिस्तदवच्छिन्ने साधने प्रवृत्तिरिति न दोषः। यद्यपि फलसाधनस्यैव तदुद्देशप्रवृत्तकृतिं प्रति सम्बन्धार्हत्वं प्राधान्यं तथापि लाघवा[2]व्यवधानाभ्यां तदेव प्रवर्तकमस्तु।

ननु सुखतत्साधनादिस्वरूपमेव प्रयोजनत्वं ततः कृतिप्रयोजनं प्रवर्तक°मिति वदता कृतिविषयसाधनादिस्वरूपमेव प्रवर्तकमित्युक्तं स्यात्। किञ्च कृतिनिरूपकाकारस्य प्रवर्तकत्वे साध्यमात्रस्यैव निरूपकत्वात्साध्यमात्रं प्रवर्तकं स्यात्। उच्यते। कृतितत्साध्ययोः साध्यसाधनभावो निरूप्यनिरूपकभावो गुणप्रधानभावः प्रयोजनप्रयोजनिभावश्चेति बहवः सम्बन्धा विद्यन्ते। प्रयोजनत्वं नाम साक्षाद्वा परम्परया वा पुरुषोपयोगित्वरूपेण सुखतत्साधनदुःखाभावतत्साधनेष्वनुवर्तमानमेकमेव न तु व्यावर्तमानं सुखादिस्वरूपं तदाकारनिरूप्या वा तदाकारानुकूला वा तदुद्देशप्रवृत्ता वा कृतिः कार्यकृतिरित्युच्यते। तदानुकूल्यं नाम तत्प्राधान्यं तत्साध्याधीनसाध्यत्वं तदुत्पादनप्रवृत्तेनोत्पाद्यत्वं वा तत्प्रयोजनत्वं तद्द्वारा पुरुषोपयोगित्वं तदुद्देशप्र[3]वर्तकत्वं तदर्थो[4]पायत्वं तत्कर्तुस्तदवान्तरव्यापारतया निरूप्यत्वं वा तदिच्छया प्रवृत्त्यर्हत्वं वा तथापि न दोषः। किञ्च कृतिर्हि नियमेन पुरुषोपयोगिनः कस्यचित् साधकव्यापारतया निरूप्यते। तदर्थञ्चोत्पाद्यतेऽन्यदानुषङ्गिकमुत्पद्यते। तस्मात्कृतिसाध्याकारविशेषस्यैव प्रवर्तकत्वं लाघवाव्यवधानाभ्यामिति सिद्धं तत्स्वरूपस्य निरूपितत्वात् न दुर्निरूपत्वमिति च सिद्धम्।

नन्वेवं कार्याकारस्य प्रवर्तकत्वे तदाकारस्यैव लिङ्वाच्यत्वं स्यात् नत्वपूर्वस्य। उच्यते। स्वर्गकामो यजेतेत्यत्र कामिपदयोग्यतार्थं स्थायिकार्येऽभिधित्सिते यदि कार्यमात्रं लिङाऽभिधेयं स्यात् कामिनियोज्यान्वययोग्यता न स्यात्। स्थायिविशेषस्यैव कार्यबोधार्हत्वात् तत्र प्रमाणाभावाच्च।

अथाभिधीयमानं [1]कार्यं स्वसामान्यगोचरत्वादपर्यवसानवृत्तेर्विशेषमात्रविषयत्वाद[2]र्थोपादानिकं स्थायित्वमिति चेन्न अनन्वयत्वाद[3]नन्वितत्वाच्च। तस्मात्स्थायिविशेषस्यैव योग्यत्वात्सामान्यस्यायोग्यत्वाद्विशेषस्यैवाभिधेयत्वम्। तच्च शक्तिं विना न संभवतीति स्थायिकार्ये लिङः शक्तिराश्रीयेत तथा निरतिशयप्रीतिविशेषे स्वर्गशब्दप्रयोगात्तत्रैव शक्तिरन्यत्र लक्षणा। एवमपूर्वे लिङः शक्तिः, क्रियाकार्ये लक्षणा। प्रवर्तकशक्तिस्तु कार्यमात्र एवेति सिद्धम्। शब्दतद्व्यापारयोः स्वकीयस्तनपानादिषु प्रवृत्तिहेतुत्वादर्शनान्न तयोः प्रवर्तकत्वं शङ्कितं फलस्य तु कार्याकारस्य प्रवर्तकत्वमिष्टमेव अतदाकारस्य व्यभिचारादत एव प्रैषादीनां व्यापारमा[4]त्रस्य च न प्रवर्तकत्वं, प्रवर्तकत्वाभावात्तेषां तद्विशेषरूपविधित्वमपि न सम्भवति। तस्मात् सिद्धं कार्यस्यैव प्रवर्तकत्वमिति।

तथाभूतार्थसम्बन्धः प्रामाण्यं शक्तिरेव वा।
ज्ञानानां ज्ञानतो वा स्यात्तत्सामग्रीत एव वा ॥ ३० ॥

**। स्वतः प्रामाण्यनिरूपणम्।**

अत्र केचित्—नन्वतथाभूतमित्यादिभाष्येण प्रामाण्याप्रामाण्ययोः स्वतस्त्वपरतस्त्वपरीक्षा क्रियत इत्याचक्षते। अत्र सांख्याः—असतः साध्यत्वासंभवात् द्वे स्वत इत्याहुः। तथाहि—यदसत् तन्न क्रियते यथा—शशशृङ्गं क्रियते च घटादिः—नचाकाशादेः सतः क्रियानिवृत्तेरसाधारणत्वं हेतोरिति वाच्यं तस्यापि क्रियाङ्गीकारात्। न च सदसद्विलक्षणायाश्चितिशक्तेः सत्त्वं येनासाधारण्यं स्यात्। न चात्मनः सत्त्वं अर्थक्रियाकारित्वप्रमाणसम्बन्धसत्तासामान्यानामभावात्। न च प्रागुत्पत्तेर्घटादीनां न सत्तालक्षणमस्तीति वाच्यं लक्षणावस्थापरिणामाङ्गीकारात्। न च प्रत्यक्षानुपलब्धिविरोधः वर्तमानलक्षणपरिणामवत एवास्तप्रत्यक्षत्वात्। स च [5]परिमाणोऽनभिव्यक्तत्वान्नोपलभ्यते। अथाभिव्यक्तिः सत्त्वे प्रागुपलभ्येत असत्त्वे[6]ऽसदुत्पत्तिदोष इति चेन्न। तस्याप्यभिव्यक्तिस्वीकारात्। नचानवस्था। उत्पत्तिपक्षेऽपि तुल्यत्वात्। अथ कारणव्यापार एवोत्पत्तिस्तद्व्यपारस्य स्वक[7]रणव्यापार उत्पत्तिः तस्याप्येवमित्यनादित्वात् अदोष इति चेत्—न अस्मिन् मतेऽपि तुल्यत्वात्। न च कारकव्यापारानर्थक्यम्। अभिव्यक्त्यर्थत्वात्। अभिव्यक्तिश्च स्वरूपनिमित्तार्थ-

क्रियासामर्थ्याविर्भावः । स चोत्पत्तिरित्युच्यते ज्ञानरूपार्थक्रियासामर्थ्याविर्भावोऽभिव्यक्तिरित्युच्यते ।

किञ्च केयमसतः उत्पत्तिः पूर्वमविद्यमानत्वमिति चेत्, किमिदमविद्यमानत्वं नाम ? किमनुपादेयत्वमुताभावः ? आहोस्वित् तत्प्रतियोगित्वम् । न तावदाद्यः कल्पः—भविष्यदादौ प्रमाणोदयात् । नापि द्वितीयः—नास्तीति बुद्ध्यबोध्यत्वात् । नापि तृतीयः तत्प्रतियोगिनः सत्त्वात् । नासदुत्पत्तिः । किञ्चोपादाननियमोऽप्यस्मिन्नेव पक्षे घटते । शक्तिविशेषयोगादुपादाननियमो घटत इति चेत्—न नामान्तरेण भाविस्वीकारप्रसङ्गात् । तस्मात्सत एवोत्पत्तिः । अत्रोच्यते सत उत्पत्तिर्न सम्भवति । सत्याः प्रकृतेरनुत्पादनात् । न च प्रकृतिरपि प्रतिक्षणं परिणामशालिनी जायत इति वाच्यं, अनुवर्तमानधर्मिरूपस्य जन्माभावात् । तस्मादसाधारणत्वं सिद्धम् । किञ्चाभिव्यक्त्यानैकान्तिकत्वं हेतोः, यच्चोक्तमभिव्यक्तिः सत्येव पूर्वमनभिव्यक्तेति । तदयुक्तम् । अभिव्यक्तिरनभिव्यक्तेति वदताऽभिव्यक्तेरभावस्यैवोक्तत्वात् । अभिव्यक्तेरनभिव्यक्तिर्नाभावः किन्तु तिरोधानाख्योऽयं धर्म इति चेत्; न, भावान्तरमभाव इत्यस्य पक्षस्य निराकरिष्यमाणत्वात् । तस्मादभिव्यक्तावनैकान्तिकत्वं सिद्धम् ।

यच्चोक्तं किम[1]सत्यत्वमित्युच्यत इति उत्पत्तिकाले सतस्तत्पूर्वकाले सर्वत्राभावप्रतियोगित्वमित्युपपन्ना असत उत्पत्तिः उपादाननियमश्च शक्तिविशेषेणाप्युपपद्यते । न च शक्तिः कार्यं तद्विलक्षणत्वात् । कार्योत्पत्तौ कारणसहकारित्वाच्छक्तेः । ज्ञेयाभावेऽपि तन्निरूप्यज्ञानवच्छक्त्यभावेऽपि तन्निरूप्या शक्तिरुपपद्यते । तस्मादसदुत्पत्तिसम्भवात् द्वे स्वत इति न युक्तम् । किञ्च द्वयोः स्वतस्त्वे विभागाभावात् सर्वत्र प्रवृत्तिर्न स्यात् अतः सिद्धं न द्वे स्वत इति ।

अन्ये द्वे परत इत्याहुः तत्र प्रमाणाप्रमाणव्यक्तिलक्षणे विलक्षणसामग्रीके विलक्षणरूपकार्यत्वात् ।

किञ्च प्रमाणव्यक्तिर्न ज्ञानसामग्रीजन्या तस्यामनुत्पद्यमानत्वादप्रमाणव्यक्तिवत् शुक्तिकारजतमरीचिकाजलज्ञाने ज्ञानसामग्र्यां सत्यामपि प्रमाणव्यक्त्यनुभवात् । अथ दोषैः प्रतिबद्धा सामग्री प्रमाणज्ञानं न जनयतीति चेत् न तर्हि ज्ञानसामग्रीमात्रजन्यं प्रमाणमुद्भूतसामग्रीजन्यत्वात् । तत्रोद्भव एव

गुणपदार्थ इति गुणाधीनं प्रासम् । अथ यथाभूतं ज्ञानं तथाभूतोऽर्थ इति निश्चयः प्रमाणकार्यं तच्च ज्ञानस्वभावादेव सिद्धमिति स्वत इत्युच्यते । अन्यथात्वनिश्चयो ज्ञानान्तराधीन इति परतोऽप्रामाण्यमित्युच्यत इति चेत्—न तथाभूतार्थनिश्चयस्यार्थतथात्वातथात्वसाधारणत्वात् न ज्ञानमात्रादर्थतथात्वाध्यवसायः । किन्तु गुणवत्सामग्र्याः प्रमाणोत्पत्तिः तज्ज्ञानादर्थतथात्वाध्यवसायः । दोषैरप्रमाणमुत्पद्यते तज्ज्ञानादतथात्वनिश्चयः । दोषाभावतज्ज्ञानाभ्यां प्रमाणोत्पत्तेः [1][स्व](स)त्वेऽध्यवसायादिति स्वतः प्रामाण्यमित्युच्यत इति चेन्न—वैपरीत्यस्यापि सम्भवात् । गुणैरेव प्रमाणं जायते तदभावेऽप्रमाणमिति ।

ननु गुणनिश्चयात्तथात्वाध्यवसाने तन्निश्चयस्यापि गुणनिश्चयान्तरायत्तत्वादनवस्था प्रसज्यत इति चेन्न—ज्ञानेषु कानिचिदर्थक्रियां व्यभिचरन्ति कानिचित् न, तत्र भूयोदर्शनेनेदृशस्य व्यभिचारोऽस्तीदृशस्य नेत्यव्यभिचाररूपनिश्चयाद्व्यवहारः प्रवर्तते, कचित् तद्रूपसंशयेऽपि तदसाधारणार्थक्रियादर्शनादर्थत[था]त्वनिश्चयो भवति अर्थक्रियाज्ञानस्य परापेक्षा नास्ति तस्मादनवस्थास्मिन् पक्षे नास्तीति न कदाचिदनुपपत्तिः ।

किञ्च स्वतः प्रामाण्यवादेऽपि तदपवादाभावस्य दोषाभावज्ञानायत्तत्वात्तदभावनिश्चयस्यापि दोषाभावनिश्चयान्तरायत्तत्वात्तस्याप्येवमित्यनवस्थाप्रसङ्गस्तुल्य एव । तस्मात् द्वे परत इति सिद्धम् ।

अत्रापरे द्वयोः पराधीनत्वकल्पनायां गौरवदोषात्प्रामाण्यस्य वस्तुत्वात्पराधीनत्वमप्रामाण्यस्यावस्तुत्वात्परानपेक्षत्वमित्याहुः ।—

तथाहि-वस्तुतथात्वसम्बन्ध एव प्रामाण्यं तदभावोऽप्रामाण्यम् । तच्च प्रामाण्यमज्ञाने आश्रयाभावान्नोत्पद्यते । संशये विपर्यये च सत्यप्याश्रये नोत्पद्यत इति स्वतोऽप्रामाण्यमित्युच्यते । प्रामाण्यमर्थक्रियासामर्थ्यात्मकमर्थक्रियाज्ञानेनावगम्यते । पूर्वन्तु संशयाद्वा तत्सामर्थ्यव्याप्तस्वरूपज्ञानाद्वा व्यवहारः प्रवर्तते । यद्यपि [2]सुखादिरूपार्थक्रियाज्ञानं सत्यं तथापि तत्कारणकामिन्यादिस्वरूपनिमित्तार्थक्रियाबाधात् सुखादेश्च ज्ञानमात्रायत्तत्वात् ज्ञानमात्रमेव स्वप्न इति निश्चीयते ।

किञ्चाज्ञानरूपस्याप्रामाण्यस्यावस्तुत्वमकारणाधीनत्वं च निश्चितमिति तथा विपर्ययात् प्रामाण्यस्यातथात्वमाश्रयितुं युक्तम्। तस्मादप्रामाण्यं स्वतः प्रामाण्यं परत इति सिद्धम्।

अत्रोच्यते—तथाभूतार्थसम्बन्धः प्रामाण्यं, स च ज्ञानमात्राधीनस्त-च्छक्तिरपि ज्ञानसामग्र्यधीना, न कारणान्तरमपेक्षते। अप्रमाणज्ञानेऽपि तथाभूतार्थसम्बन्धस्तच्छक्तिश्चास्ति। किन्तु अयथार्थसम्बन्धस्तच्छक्तिश्चाधि-कमस्ति (न)[1] [स] चान्याधीन इति परत इत्युच्यते। अत एव पीतशङ्खशुक्ति-कारजतादिज्ञाने च शङ्खांशेदमंशभास्वरत्वपरिणामादिज्ञानं यथार्थम्। नचैवं सर्वज्ञानानामयथार्थसम्बन्धोऽस्तीति तन्न स्वत इत्युच्यते। नचाप्रामाण्य-मभावरूपं विपर्यय(ा)भावदर्शनात् अज्ञाने प्रामाण्यमप्रामाण्यञ्चोभयं नास्तीति न स्वतः नापि परत इति सिद्धम्।

प्रामाण्यमेव स्वतः अप्रामाण्यं परत इति-अत्र हेत्वन्तराधीनत्वे प्रमाणाभावाल्लाघवाच्च प्रामाण्यं स्वत एवोचितम्। अथ दोषाभावान्वयव्यति-रेकाभ्यां तद्धेतुत्वात्प्रामाण्यस्य पराधीनत्वमस्तीति चेत्, न, अन्यथासिद्धत्वात्। दोषेष्वप्रामाण्यं तदभावेऽप्रामाण्याभावात् केवलं प्रामाण्यमेवेत्यन्यथासिद्धत्वम्।

यत्तु विलक्षणसामग्रीकत्वं तत्सिद्धं साध्यते यत्तु तत्सामग्र्यां सत्यामनु-त्पत्तिरिति तदसिद्धमेव। किञ्च प्रामाण्ये तन्निश्चये च पराधीनेऽनवस्था स्यादित्युक्तम्।

ननूक्तमर्थक्रियाज्ञानाद्वा तद्व्याप्तस्वरूपज्ञानाद्वा यथार्थत्वनिश्चया-द्व्यवस्था भवतीति सत्यमुक्तम्। अयुक्तंतु तत् अर्थक्रियाज्ञानस्यापि स्वप्नादौ वस्तुयाथार्थ्यव्यभिचारात्। अथ तत्र व्यभिचाराद्वस्तुयाथार्थ्यं नास्तीति चेन्न, व्यभिचारस्यापि कदाचिद्व्यभिचारात्परत एव यथार्थत्वं; तथा च सत्यनवस्था तदवस्था स्यात्।

यत्तु प्रामाण्यापवादपरिहारार्थं कारणदोषबाधकाभावेऽपेक्षिते तवाप्य-नवस्था समानेति। तदनुपपन्नं, दोषबाधकौ चेददृष्टौ तदा त्वप्रामाण्यमेव न तत्र परापेक्षा न दृष्टौ चेत्पूर्वत्र[2] प्रामाण्यमेव तत्रापि न परापेक्षा तस्मादस्मत्पक्षे नानवस्थास्तीति सिद्धम्।

किञ्च न दोषाभावात् प्रामाण्यं सत्यपि दोषे पीतशङ्खादिज्ञाने प्रामाण्य-दर्शनात् न च तत्रांश एवदोषो न सर्वत्रेति वाच्यं ज्ञानस्यांशाभावात्। किन्तु एकमेव ज्ञानं स्वसामग्रीजन्यत्वात् तत्त्वसम्बन्धि, दोष[ज]त्वाद्[1] सत्त्वसम्बन्धि चेति तस्मात्प्रामाण्यं स्वत इति सिद्धम्।

अथवाग्नेरौष्ण्यमिवापां शैत्यमिव च स्वाभाविकं ज्ञानस्य प्रामाण्यं तद्वदेव कदाचिद्दोषैरभिभूयते। न च काचकामिलातिमिरादयो दोषाः यथोपलभ्यन्ते न तथा गुणा उपलभ्यन्ते। अत एव न वैपरीत्यसम्भावना। तस्मात् स्वतः प्रामाण्यं परतोऽप्रामाण्यमिति सिद्धमिति केचित् भाष्यार्थमाचक्षते तदनुपपन्नं—स्थलान्तरे औत्पत्तिकसूत्रे सूत्रकारभाष्यकाराभ्यां स्वतः प्रामाण्यस्योक्तत्वादर्थासंस्पर्शित्वशङ्कानिरासयोरन्यत्र स्वकण्ठेनानुक्तत्वात्। अत्र प्रतिज्ञानिर्वाहार्थमपेक्षितत्वाच्च तदुपन्यासपरं भाष्यं युक्तम्। तदुपन्यासश्च यन्न व्यभिचरति तदथ[ा]संस्पर्शि यथा चक्षुः व्यभिचारी च शब्दः। न च विवेक[2]ग्रहसमाधेयो व्यभिचारः। कारणदोषाभावात्। वक्ता तु केवलं शब्दव्यक्तावेवोपयोगीति न तद्दोषाः कारणदोषास्तस्मात्स्वाभाविकं शब्दस्यार्थानिश्चायकत्वं, शब्दानन्तरं व्यवहारस्तु सन्देहान्मानान्तराद्वोपपद्यते तस्माच्छब्दोऽर्थासंस्पर्शीति सिद्धम्॥

निरासस्तु शब्दजन्यज्ञानस्य व्यभिचाराभावात्। व्यभिचाराभिमानस्तु लिङ्गाभासजन्यज्ञानस्य लौकिकवाक्यविशेषस्य पूर्वं वक्तृज्ञानानुमापकत्वात्तद्विशेषाज्ञानाल्लिङ्गाभासस्य व्यभिचारः न शब्दव्यभिचार इति सिद्धम्।

भ्रमादिषु निरस्तेषु तात्पर्यावगतेः परम्।
वाक्याभिधा भ्रमादीनां निरासे वक्तृधीर्गता॥ २१॥

अत्र दोषचतुष्टयरहितपुरुषप्रणीतवाक्यं ज्ञानानुमानात्पूर्वं नाभिधायकं तात्पर्यज्ञानसामग्रीरहितत्वात् तात्पर्यज्ञानं चाभिधानकारणतयाव्युत्पत्तिसिद्धम्। अन्यपराच्छब्दादभिधानादर्शनाद्वेदे च पदपदार्थसामर्थ्याधीनं तात्पर्यावधारणं, लोके स्वभिप्रायाधीनं, विविधाभिप्रायाश्च नरा वाक्यं रचयन्तो दृश्यन्ते भ्रमेणाशयदोषेणाशक्त्या प्रमादेन च। तत्राशयदोषादिशङ्कायां स्वार्थतात्पर्यानिश्चयादभिधानं न भवति तन्निरासोत्तरकालं तात्पर्यनिश्चियादभिधानं भवति।

ननु लौकिकं वाक्यं सर्वमेव प्रागनुमानादनभिधायकमिति वः सिद्धान्तः। तच्च न घटते। सत्यासत्यवाक्यद्वयदर्शनोत्था हि शङ्का न सार्वत्रिकी सम्भवति। अथात्मन्युभयथा वाक्यरचनादर्शनात्परवाक्यप्रयोगे शङ्का भवतीति चेत्। मैवं अव्यापित्वात् न हि सर्वेषां प्रथमतः उभयथा आत्मनि दर्शनमस्ति। यस्य प्रथमं कतिपयेषु वाक्येषु सत्यता[1]दर्श[नं] (नात्)नासौ शङ्कते। अथ स्वभावपरामर्शेन प्रयोगहेतुज्ञानविवक्षाप्रयत्नदोषेण भ्रमाशयदोषाशक्तिप्रमादरूपेण दूषितत्वशङ्कया सर्वत्रायथार्थत्वशङ्कास्तीति चेत् यस्त्वेवं स्वभावं न जानाति तस्याभिधानभ्रम एव। धूमेनाग्नेर्व्याप्तिभ्रमेणानुमानभ्रम इव तस्यैव पश्चाद्व्युत्पन्नस्य स्वभावपरिज्ञानमस्तीति न कश्चिद्दोष इति चेत् मैवं सर्वत्र दोषसम्भावनया शङ्कायोगात् अतिप्रसङ्गात्।

अथ प्रत्यक्षादौ स्वतः प्रामाण्यन्यायेन स्वतो निश्चयो भवति पश्चाद्बाधकप्रत्ययेन दोषदर्शनेन वाऽन्यथात्वं [2]दोषसंभावनया शङ्केतिचेन्न—इहापि तर्हि तथास्तु प्रथमनिश्चयो भवति पश्चाद्दोषशङ्कायां वक्तृज्ञानानुमानेन दृढीक्रियते।

यस्तु निरूपितानाप्तभावस्तस्य वचनादन्यथात्वनिश्चयः तैमिरिकस्येव पीतशङ्खादिज्ञाने।

यस्तु निरूपिताप्तभावस्तस्य वचनान्निश्चय एव अनिरूपितोभयभाववचनादपि वेदवत् तात्पर्यनिश्चयात् स्वतो निश्चय एवातो नायथार्थत्वशङ्का।

किञ्च सर्वत्र शङ्कायामनुमानमपि न सम्भवति। अथ यथार्थज्ञानव्याप्तनिर्दोष वाक्यदर्शनान्मूलज्ञानानुमानं सम्भवतीति चेन्न तर्हि तादृशस्य वाक्यस्य व्यभिचाराभावात् नैवं शङ्कास्ति यादृशं वाक्यमनुमापकं तादृशमेवाभिधायकमस्तु। अथ वाक्यश्रवणानन्तरं यथार्थत्वसम्यग्ज्ञानपूर्वकत्वशङ्का जायते तन्निरासार्थमपरो विचारः प्रवर्तते। किमिदं वाक्यं निर्दोषप्रणीतं नवेति। तत्र निर्दोषप्रणीतत्वे ज्ञातेऽपि पूर्वशङ्का नापैति अन्यतरकोटिनिर्धारणाधीनत्वाच्छङ्कानिरासस्य। तत्र यथार्थत्वे सम्यग्ज्ञानपूर्वकत्वे वा अन्यथात्वे वा वाक्यस्यावगते शङ्कापेयात्तदवगतिश्चानुमानतः। न च यथार्थत्वसम्यग्ज्ञानव्याप्तपुरुषविशेषप्रणीतत्वदर्शनाच्छङ्कापायः। न हि काकनिलयदर्शनमात्रेण स्थाणुपुरुषशङ्कापायो भवति अगृहीतास्मृतव्याप्तेस्तदपायाभावात्। तस्मादनुमानाच्छङ्कापायः

ततोऽभिधेति चेत्तदनुपपन्नं वेदवाक्येऽपि तथा प्रसङ्गात्। यस्य मन्दमतेर्वेदवाक्येऽपि सत्यासत्यार्थत्वविचिकित्सा जायते तस्यापि मानान्तरेणार्थमवगम्य विचिकित्सापनुद्येत। अथापवादहेतुदोषनिराकरणेन वेदादेवार्थनिश्चयाच्छङ्का नश्यतीति चेन्नैवं; इहापि साम्यादत्र[1] वक्तृदोषशङ्कैव स्वतःप्रामाण्यापवादभूता प्रथमं यद्यपि जायते तथापि तच्छङ्कानिरासे वाक्यादेवानुमानानपेक्षादर्थनिश्चयो भवति।

अथ भ्रमादिनिरासान्तर्गतैव सम्यग्ज्ञानानुमेति चेत्, न, भ्रमाद्यभावेऽपि सुषुप्त्यादौ सम्यग्ज्ञानाभावदर्शनान्न भ्रमाद्यभावः सम्यग्ज्ञानगर्भः। अथ वाक्यप्रयोगस्य भ्रमादिकारणनिरासः सम्यग्ज्ञानकारणत्वगर्भ इति चेत् केन तर्हि ज्ञानानुमानं? निर्दोषप्रयुक्तवाक्यत्वेनेति चेन्न दोषाभावान्तर्गता ज्ञानसिद्धिरित्युक्तत्वाद्यादृशेन च ज्ञानानुमानं तादृशे दोषो नास्तीत्यवोचाम। तस्मात्प्रागभिधानादनुमानं विरुद्धम्। अत्रोच्यते।

वाक्यं तावन्न चक्षुरादिवदपरामृश्य ज्ञानकृद्भवति तत्र पदपदार्थज्ञानं भवति। तत्र पदपदार्थसम्बन्धसंवेदनतत्स्मरणाकाङ्क्षासन्निधियोग्यत्वपरामर्शतात्पर्यज्ञानानामन्यतमाभावेऽभिधानमेव न भवति। यत्रापि नद्यास्तीरे फलानि सन्तीत्यादौ पश्चाद्व्यभिचारः [2]तत्र कस्य वैकल्यात् प्रमाणज्ञानं नोत्पद्यत इति विचार्यम्, वक्तृदोषैः शक्तिप्रतिबन्ध इति चेत तर्हि प्राचीनं विज्ञानमभिधानं न स्याच्छब्दशक्त्यजन्यत्वात् शब्दशक्तिजन्यं प्रमाणमभिधानमित्युच्यते तत्र धूमादिष्विव परामृश्यमानज्ञापकानां परामृश्यमानवैकल्याज्ज्ञानानुदय इति वाच्यं तत्र तात्पर्यनिश्चयेऽभिधानं भवति तदनिश्चये न भवतीत्याश्रयणं तदनिश्चयश्च विविधाभिप्रायाधीनत्वाद्वाक्यस्य।

ननु भ्रमाद्यभावे यथार्थतात्पर्यनिश्चय इति चेत्, न तन्निरासान्तर्गतं सम्यग्ज्ञानम्, तथाहि—ज्ञानचिकीर्षाप्र[3]यत्नवाक्यप्रयोगकारणं तद्दोषेषु भ्रमादिषु निराकृतेष्वन्तर्गतं सम्यग्ज्ञानमिति न तज्ज्ञेयमवशिष्यते।

ननु केन तर्हि ज्ञानानुमानम्। उच्यते यो वाक्यप्रयोगेष्वाशयदोषादिरहितोऽयमिति निरूपितस्वभावः तस्य वचनश्रवणानन्तरमस्मिन्नपि प्रयोग आशयदोषादिरहितोऽयं तत्पुरुषत्वादिति यावदेवं नानुमीयते तावद्यथार्थतात्पर्य-

निश्चयो नास्त्ययोग्यपदसन्निधानशङ्कापि नापैति विस्मृततत्स्वभावस्य शङ्कोदय-दर्शनात् ।

यस्तु निरूपितविपरीतभावस्तस्य वचनाद्भ्रमादिरेवानुमीयते अनिरूपितोभयभाववाक्ये प्रथमं शङ्कैव पश्चाद्देशकालादिना तत्स्वभावमवगम्य भ्रमाद्यभावे सम्यग्ज्ञानमनुमीयते ।

एवं ज्ञानानुमाने ज्ञेयभूतवाक्यार्थस्यापि नान्तरीयकसिद्धत्वाद्वाक्यं पश्चादनुवादकं भवति । स्यादेतदेवं शङ्कायामपि वक्तुं[1] मनश्चक्षुरादिदोषशङ्कैव जायतां तन्निरासे निर्दोषाद्वाक्याद्वेदवदभिधानमस्तु न तत्र सम्यग् ज्ञानान्तर्गतिरस्ति इति मैवं वाक्यप्रयोगस्य ज्ञानाद्येव साक्षात्कारणं न चक्षुरादीति तव परीक्षणमपि भ्रमादिनिरासार्थमेव ।

नन्वाप्तत्वं नाम पुरुषधर्मस्तच्चैवं सकृदेवावगतमिति तद्वाक्यश्रवणे नैव शङ्का, नाप्यनुमानमिति । तन्न प्रयोगोपाधित्वादाप्तत्वस्य । यद्यपि सामान्येन सकृदेवावगतं तथापि इदानीमयमदुष्ट इति ज्ञानं तात्पर्योपयोगि । किञ्च येन हेतुना सकृद्वा असकृद्वा भ्रान्त्यादिनिराकरणं तेनैव ज्ञानमप्यवगंस्यते ।

नन्वनवगते वाक्यार्थे कथं वक्तृःतद्विषयज्ञानानुमाने,[2] उच्यते पदैः पदार्थेषु स्मारितेष्वाकाङ्क्षादिवशेन यदन्वयप्रतिपादनयोग्यत्वपरामर्शो भवति तद्विषयं वक्तुर्ज्ञानमनुमीयते परामर्शश्च तर्कापरपर्यायः प्रमाणेतिकर्तव्यताप्रमाणकोटिरत एव गुरुवचनमविरुद्धं प्रमाणं स्मृतिश्च प्रत्यय इति अतो न कश्चिद्दोषः ।

नन्वेवं व्यवहारावसितशक्तिबाधः प्रसज्यते । मैवं स्वशक्तिविषय एवार्थे सन्देहात्तज्ज्ञानानुमानात्तत्पर्यनिश्चयादनुवादाच्च न शक्तिभङ्गः । किन्तु पुरुषसम्बन्धोपाधिनाभिभूता तदुपाधिविगमेऽपि निरुपद्रवावतिष्ठते । अतो न कश्चिद्दोषः

विमतिपदं वाक्यमनुमानानपेक्षमभिधायकं निर्दोषवाक्यत्वादनाप्ताप्रणीतत्वाद्वेदवाक्यवत् । अनुमानानपेक्षायां निश्चिततात्पर्यत्वमुपाधिः प्रागनुमानादनिश्चयस्योक्तत्वात् । न साधनव्यापकत्वं विमतिपदं वाक्यमनुमानापेक्षमभिधायकं अभिप्रायमूलपदसङ्घातत्वात्सङ्केतपदवदनिश्चिततात्पर्यं[3] तत् अनिरा-

कृतसम्भावितान्यतात्पर्यत्वात् तादृशवाक्यवत् । तस्मात्सिद्धमभिधानात् प्रागनुमापकत्वमिति ।

व्याप्त्या वानुपपत्त्या वा यत्स्वभावावधारणम् ।
ज्ञातमात्रे विमर्शे[र्शो]ऽसौ प्रमिते त्वनुमादिकम् ।
सोयमूहश्च युक्तिश्च तर्कश्चेत्यभिधीयते ॥ ३२ ॥

अयुक्तिगोचर(त्मा)[न्मा]नं विनिहत्य सयुक्तिके ।
वर्तमानमनुज्ञाय मानसाहाय्यमाचरन् ॥ ३३ ॥

स्मरणव्यतिरिक्तत्वान्मानकक्ष्यां विगाहते ।
स एव पूजितत्वेन मीमांसेत्यभिधीयते ॥ ३४ ॥

स्वरूपशक्तिसामग्रीविषयप्रभृतौ सदा ।
शब्दो लिङ्गादिवत्तर्कं स्वकार्याय व्यपेक्षते ॥ ३५ ॥

सकलं विकलञ्चैव विमृश्यं तद्वदेव हि ।
न च लिङ्गप्रयुक्तत्वं कल्पकेऽपि च दर्शनात् ॥ ३६ ॥

परोक्षमिति कार्याणां स्वरूपं निश्चयं च यत् ।
ज्ञातव्यं तदपि ज्ञाने न प्रमा हेत्वभावतः ॥ ३७ ॥

तस्माच्छब्दस्य सामग्री तात्पर्यप्रमितिः सदा ।
तदज्ञानेऽन्यथाज्ञाने नाभिधानमिति स्थितम् ॥ ३८ ॥

॥ **श्येनादेः अधर्मत्वोपपादनम्** ॥

रागाधीनप्रवृत्तत्वाच्छ्येनस्य तु निषिद्धता ।
विध्यधीनप्रवृत्ताङ्गहिंसा नैव निषिध्यते ॥ ३९ ॥

ननु कथं प्रधानस्य फलाधीना प्रवृत्तिः कथं वाऽङ्गस्य विध्यधीना—उच्यते काम्येषु करणीभूतस्य वियत्वं नित्येषु विषयीभूतस्य करणत्वमिति इयं व्यवस्था तावदस्ति-तथाहि कामिनियोज्यं प्रति काम्यमानोपायस्यैव [1]काम्यत्वेन बोधार्हत्वात् यागस्य [2]फलव्यवहितस्योपायत्वासंभवात्क्रियातिरिक्तं कार्यमिति स्थिते भावार्थस्यैव साक्षात्कृतिसाध्यत्वदर्शनादभावार्थत्वात्कार्यस्य भावार्थव्यवधानेन साध्यत्वाद्यागस्य मध्येऽन्तर्भावो जातः तस्य कामिकृतिव्याप्त्यर्थं फलं प्रति करणत्वमनुसन्धेयम् ।

नन्वयोग्यत्वात्फलं प्रति यागस्य साधनत्वा[1]त् करणत्वमपि न सम्भवति मैवं साधनत्वं हि साध्यसम्बन्धि साध्याव्यवहितमेव। करणत्वन्तु क्रियासम्बन्धित्वात्तदव्यवहितमेव भवति। क्रियां प्रति साधनविशेषस्य करणत्वात्साधकतमस्य करणत्वस्मरणम्। न च कार्यबुद्धिवत्कृतिरपि फलाव्यवहितमेव व्याप्नोतीति वाच्यम्। कार्यबुद्धिर्हि प्रथमं फलं व्याप्य तदर्थितया तत्साधनं व्याप्य ततः साधनसाधनेऽवतरति, कृतिस्तु साक्षाद्वा परम्परया वा प्रयोजनोपयोगिनं भावार्थं व्याप्य तद्द्वारा प्रयोजनं साधयतीति युक्तम्।

यागस्य करणत्वं पश्चाद्याग एव कृतिसाध्यतां कार्यस्य बध्नातीति विषय इत्युच्यते तदेवं काम्ये करणीभूतस्य विषयत्वं नित्ये तु कामिकृत्यधीन-विशेषाभावाद्विषयीभूतस्य विधिकरणत्वमिति व्यवस्था सिद्धा तत्र फलकरणे यागे फलान्वयस्य प्रथममवगतत्वात् फलरागादेव तत्र प्रवृत्तिर्युक्ता।

ननु वि[2]षयत्वान्वयार्थं फलकरणत्वावलम्बनात् फलान्वयाद्विध्यन्वयस्यैव प्राथम्यम्। मैवम्। विध्यन्वयस्य तदानीमनिरूढत्वान्न तस्य प्राथम्यम्। यद्यपि तस्य प्राथम्यं तथापि प्रतिपत्त्यनुबन्धित्वाद्विषयभावस्य न साध्याधीन[3]साधनगोचरा प्रवृत्तिस्तत्र (न)[4] संभवतीति फलत एव तत्र प्रवृत्तिः।

ननु सेतिकर्तव्यताकस्य करणत्वात्तत्रापि फलाधीना प्रवृत्तिः स्यात्; तन्न, करणस्य हीतिकर्तव्यतायोगः न पुनरितिकर्तव्यतायुक्तस्य करणत्वं किं केन कथमित्येवं ह्यपेक्षा। तत्र किमंशस्यापरिपूर्णत्वात् करणांशान्तरस्य चापरिपूर्णत्वात् न तावदितिकर्तव्यतापेक्षं[5], फलेन लब्धकिमंशायाः कृतेरपूर्वमपि किमंशोपनिपतितम्। तन्निर्वाहार्थं विषयान्वयः, तन्निर्वाहार्थं फलान्वयस्तत्र फले साध्यांशस्य निरूढत्वात्तदंशं प्रति करणत्वेनान्वयः। फलकरणत्वस्यापूर्वसाध्यांशनिर्वाहार्थत्वात् न तावदितिकर्तव्यतापेक्षा। ततो विषयत्वद्वाराऽपूर्वसाध्यांशनिर्वाहः। तस्मिन्नंशे पूर्णे ततस्तदंशं प्रति करणत्वं, ततः करणे पूर्ण इतिकर्तव्यताकाङ्क्षायामपूर्वगृहीतानामपूर्वं प्रतीतिकर्तव्यतात्वेनान्वये पश्चादर्थात्फलान्वय इति तेषु शीघ्रत्वाद्विधिप्रयुक्तिरेव।

नन्वेवं काम्ये करणमात्रस्य विषयत्वाद्विधिप्रतिपत्तिः स्यादिति इतिकर्तव्यताभा[6](व्ये)[वे]ऽपि अनुष्ठानं स्यात्-तन्न-इतिकर्तव्यतासहितस्य साधनत्वादिति-

कर्तव्यताभावे साधनत्वाभावात्तद्विशेषरूपं करणत्वमेव नास्तीति विषयाभावात्कार्यप्रतीत्यभावात् अननुष्ठानं स्यादित्यादि सर्वशक्तौ प्रपञ्चयिष्यते। श्येनस्य रागाधीनप्रवृत्तित्वान्निषिद्धता अग्नीषोमीयस्य विध्यधीनत्वान्न निषिद्धत्वमिति सिद्धम् ॥

ननु कथं निषेधविधीनां रागाधीन(त्व)प्रवृत्तिविषयत्वम्। उच्यते। क्रतुप्रवृत्तिविषयत्वे क्रत्वर्थत्वप्रसङ्गात्। उभयविषयत्वे पक्षे क्रत्वर्थ[1](त्वा)प्रसङ्गात् स्वातन्त्र्यहानाद्रागाधीनविषयत्वं निश्चीयते।

ननु सामान्येन प्रवृत्तिविषयत्वे न क्रत्वर्थत्वं, क्रतुप्रवृत्तिविषयत्वेऽपि न क्रत्वर्थत्वं यथा भोजनार्थप्रवृ(त्ति)[त्त]हिंसाविषयत्वेऽपि पुरुषार्थत्वं न भोजनार्थत्वम्। अत्रोच्यते—अनारभ्य तावत्प्रवृत्तिविषयो निषेधश्रुतेस्तत्र नित्यपक्षे वा क्रत्वधीनप्रवृत्तिसंस्पर्शे वा क्रत्वर्थत्वेनाधिकारान्तरं न कल्प्येत, भज्येत तदा स्वातन्त्र्यं तत्परिहारार्थं पुरुषाधीनप्रवृत्तिविषयत्वं कल्प्यते। भोजनादीनां निषेधाङ्गानपेक्षत्वात्तदङ्गत्वे विरोधाच्च न तदङ्गत्वं तस्माद्भिन्नविषयत्वात् निषेधस्याग्नीषोमीयहिंसायां नावतारः श्येने त्ववतार इति सिद्धम्।

अत्रापरे ब्रुवते—

न हिंस्यादिति शास्त्रस्य सामान्यविषयत्वतः।
हिंस्यादिति विधेयार्थविशेषे नैव सम्भवः ॥ ४० ॥

अग्नीषोमीयहिंसाऽतो धर्म इत्यूचिरे परे।
न भिन्नगोचरत्वेन शास्त्रयोरनयोर्द्वयोः ॥ ४१ ॥

समुच्चयस्य युक्तत्वान्न बाधन्यायसम्भवः।
क्रतूपकारकत्वेन तदङ्गविधिरिष्यते ॥ ४२ ॥

पुरुषं प्रत्युदास्तेऽसौ निषेधः पुरुषस्य हि।
निषेध्याद्दुरितोत्पत्तिमाहोदास्ते क्रतुं प्रति ॥ ४३ ॥

क्रतूपकारिणो दानतपश्चर्यादयो नरे।
अपकारितया दृष्टा(दृ)[दु]ष्टा मांसादयो यथा ॥ ४४ ॥

विपरीता नरेच्छा तु व्यवस्थाहेतुरिष्यते।
बहुत्वमैहिकत्वं वा तस्माद्युक्तः समुच्चयः ॥ ४५ ॥

नित्यानुष्ठेयताङ्गेषु यद्यप्यस्ति तथापि तु ।
शिष्टयागाद्युपायेन नित्यानुष्ठानसम्भवः ।
तस्मादङ्गेषु हिंसायामनर्थत्वमिति स्थितम् ॥ ४६ ॥

ननु निषेध्यात्प्रत्यवायोत्पत्तिः कथं स्याद्यावता विधिप्रतीतिप्रवृत्त्योरन्यथोपपन्नत्वात्प्रत्यवायकल्पनायां न प्रमाणमस्ति निषेध्यप्रवृत्तस्य नियोज्यस्य लाभान्न प्रतीत्यनुपपत्तिः तथा कार्यप्रतीतिबलादेव प्रवृत्तिरप्युपपद्यते ।

ननु सुखतत्साधनयोर्दुःखाभावतदुपाययोश्च कृत्युद्देश्यत्वदर्शनादतथा-[1]विधेर्नियोगेन कृत्युद्देश्यता सम्भवति-तन्न-यथा सुखसाधनता कृत्युद्देश्यताबोधिका लोके तथा वेद एव कृत्युद्देश्यतां बोधयति । कृत्युद्देश्यतांशव्युत्पन्नलिङादियोगित्वाद्वेदस्य तत्प्रयोजनत्वमेव वेदः प्रतिपादयति तत्प्रयोजनत्वबोधादेव प्रवृत्तिसिद्धेर्नानुपपत्तिः ।

ननु कामिकृतिवत् पुरुषकृतिरपि स्वहितमेवोद्दिशतीति चेन्न प्रयोजनत्वमेव हितत्वं न हि प्रयोजनं प्रयोजनान्तरमपेक्षते नञर्थस्य च विषयत्वं तत्र च प्रवृत्तस्यैश्वर्यमिति कलञ्जाधिकरणे वक्ष्यते तस्मात् कथं प्रत्यवायहेतुत्वं— अत्रोच्यते नञर्थैश्वर्यासिद्धिरेव प्रत्यवायः सर्वत्रविषयैश्वर्यमेव निःश्रेयसमभिहितं, अधिकारित्वे तदसिद्धिरेव प्रत्यवायः एतावदेव नञर्थविधिपर्यालोचनया लभ्यते ।

यत्र तु नञर्थविधिवाक्यशेषे प्रत्यवायस्य साध्यत्वश्रुतिस्तत्र तत्प्रत्ययतोऽधिकारविधिः सर्वत्र प्रायश्चित्ताम्नानबलाद्वा प्रत्यवायपरिहारोऽवगम्यते । तस्मात्फलद्वारेण प्रत्यवायहेतुत्वं श्येनस्येति सिद्धम् ।

तत्सम्बन्धाक्षजातं श्रुतिगतविषये विद्यमानोपलम्भा-
त्प्रत्यक्षं न प्रमाणं प्रमितिरनुभवस्तं स्मृतेरन्यमाहुः ।
ज्ञातज्ञानस्वभावा स्मृतिरथ नियतं लक्ष्म साक्षात्प्रतीतिः
प्रत्यक्षं सा स्वरूपप्रमितिरियमथ ग्राहके सर्वधीषु ॥ ४७ ॥

भवनाथविविक्तस्य नयतत्त्वस्य सङ्ग्रहः ।
यथामति यथाभ्यासं वर्ण्यते **भट्टविष्णुना** ॥ ४८ ॥

अनुभूतिः प्रमाणम्। अत्रापरे ब्रुवते प्रमासाधनं प्रमाणं प्रमा च तत्त्व विज्ञानं तत्त्वशब्देन संशयविपर्ययौ व्यावर्त्येते, विज्ञानशब्देन स्मृतिर्व्यावर्त्यते, तस्या गृहीतविषयत्वाद्विज्ञानशब्दस्यानधिगतगोचरज्ञानार्थत्वादिति। तदयुक्तं धारावाहिकज्ञानानां पूर्वज्ञानगृहीतविषयत्वादुत्तरेषां प्रामाण्यं न स्यात्। अथ कालभेदादुत्तरेषामधिकविषयत्वमिति ब्रूषे, तन्न, प्रत्यक्षत्वेऽपि कालस्वरूपस्यैकत्वान्नाधिकविषयत्वम्। अथौपाधिककालभेदादधिकविषयत्वमिति चेत्, तन्न, कोऽयमौपाधिको भेदः किमुपाधिः उपाधियोगो वा उपाधिजन्यो वा धर्मः? न तावदन्तिमः, तत्सद्भावे प्रमाणाभावात्। औपाधिकव्यवहारस्योपाधितद्योगाभ्यामेवोपपन्नत्वात्। आद्ययोः पक्षयोरुपाधिग्रहणेन भाव्यम्। न च सूर्यगत्याद्युपाधयो धारावाहिकसमये प्रकाशन्ते। इदन्तावभासस्तु सतः कालसम्बन्धस्य ग्रहणादुपपद्यते। अथ पूर्वज्ञानजनितप्रकाशविशिष्टवस्तुग्रहादुत्तरेषामधिकविषयत्वमिति मतं, तन्न प्रत्यक्षत्वेऽपि प्रकाशस्य कदाचिद्विषयान्तरज्ञानान्तरितत्वे विषयान्तरप्रकाशस्य भिन्नाश्रयत्वात् स्वविषयगतस्य नष्टत्वात् प्रकाशविशिष्टं तन्न संभवति। अथ वस्त्वन्तरज्ञानानन्तर्यमुत्तरज्ञानविषयकालस्य विशेष इति चेत्। मैवं वोचः। ज्ञानग्रहणनियमाभावात् न तदानन्तर्यग्रहणनियमः अर्थ[1]ज्ञानानन्तर्यञ्च नास्त्येव। अथ जिज्ञासायाः इन्द्रियव्यापारस्य वा प्रयत्नस्य वा तज्ज्ञानजनितस्य वा प्रेमादेर्नियतत्वेनावश्यकज्ञानत्वेन च कालोपाधित्वसम्भव इति चेत् मैवं वोचः—तेषामपि नियमाभावान्नियमे वा तेष्वेव सर्वदा ज्ञानप्रवाहप्रसङ्गः। त्रयाणामपि च कालविशिष्टज्ञानानन्तर्यं नास्ति तस्मान्नाधिकविषयत्वं धारावाहिकोत्तरज्ञानानामस्ति।

अथैवं मतं—अधिकविषयत्वमधिकविषयार्थे प्रकाशोत्पत्तिः। प्रत्यक्षज्ञानैश्चेन्द्रियसंयुक्तेऽर्थे प्रकाश उत्पद्यते। इन्द्रियसंयोगश्च प्रदेशवृत्तिगुणत्वात्कालप्रदेशे भवति। विभूनामप्याकाशादीनामज्ञायमानेऽप्युपाधावौपाधिकाः प्रदेशाः कार्यभाजो भवन्ति। यथा ध्वनिसंस्कारोऽवच्छिन्ननभोभागे भवति यथावाऽऽत्मनि सुखदुःखे अपि। तथा तत्तत्क्षणोपाधिपरिच्छिन्नकालाकलिते वस्तुनि प्रकाशोत्पत्तेः सर्वज्ञानानामधिकविषयत्वमस्तीति। तदिदमविचारसुन्दरम्। सत्यमज्ञातेऽप्युपाधावौपाधिकाः प्रदेशाः कार्यभाजो भवन्ति। ज्ञानं पुनरुपाधिबुद्धिमन्तरेणोपहिते नास्ति सम्बन्धिरूपत्वादुपहितरूपस्य।

अत्रेदं तत्त्वं—विभुद्रव्यमात्मादिकं सर्वत्र परिपूर्णमेव वर्तते जातिवत् परिपूर्णमेव सर्वसम्बन्धिभिः सम्बध्यते । उपाधयो नाम तस्मिन्नेव द्रव्ये भावाभावव्यवस्थापकाः । अतः सुखादिव्यवस्थापि घटते । इतरथैकेनाकाशादिनायमुपाधिः सम्बद्ध इति सर्वत्र तदुपहितत्वप्रसङ्गः । कथाकाशादीनां बहवोंऽशा विद्यन्ते अतो भावाभावव्यवस्था सर्वज्ञानानामधिकविषयत्वं चेति, तन्न प्रमाणाभावात् । उपाधिविगमेऽपि पूर्ववत्तदंशधर्मोपलम्भप्रसङ्गः । बहवस्तत्र दोषाः प्रसिद्धत्वान्न लिख्यन्ते ।

तस्मान्नाधिकविषयत्वमुत्तरज्ञानानामस्ति । तस्माद्विज्ञानपदमनर्थकम् । किञ्च कालाधिक्येऽप्यधिकांशस्यैवास्तु प्रामाण्यं, नावगतांशस्य, यथेदं रजतमित्यत्रेदमंशस्याबाधितस्य प्रामाण्यम् । अंशबाधेऽपि कृत्स्नस्याप्रामाण्ये दीर्घादिविशिष्टशब्दज्ञानमप्रमाणं स्यात् । यद्यपि स्वप्रकाशविषयपक्षे [1]एकविषयत्वं सम्भवति तथापि विज्ञानपदानर्थक्यादनुपपन्नम् । तस्मान्नेदं लक्षणम् ।

सर्वत्र पूर्णकालादौ कार्याभावं करोति यः ।
आत्मनोऽन्यत्र तं विद्यादुपाधिं स हि भेदकः ॥ ४९ ॥

अभावश्च[स्य]स्वरूपञ्च भे[2]दाज्ज्ञेयो विलक्षणः ।
क्रिया स्या[3]दुन्मुखा तत्र संयोगं वितनोत्यसौ ॥ ५० ॥

भावाभावान्तरं वास्य ह्यन्योन्याभावकारकः ।
तस्माद्व्यापिन्यपि द्रव्ये भावाभावौ व्यवस्थितौ ॥ ५१ ॥

तस्मादव्यापिता ज्ञानसंयोगादेर्व्यवस्थिता ।
यद्यप्यात्मादिगा धर्मास्तेषामेव तथापि तु ॥ ५२ ॥

रूपत्वं पारतन्त्र्यं च सोपाधिकदशां प्रति ।
तस्मादुपाधिविज्ञाने सोपाधिकमतिर्भवेत् ।
तस्मात्तत्त्वाधिगज्ञानं न प्रमेति व्यवस्थितम् ॥ ५३

अथ केयमनुभूतिः? स्मृतेरन्या । अथ का स्मृतिः? संस्कारमात्रजा प्रतीतिः । एवं तर्हि संस्कारमात्रजा प्रतीतिरात्मनि स्वरूपे चानुभूतिरिष्यते तत्रापि स्मृतितापत्तेरतिव्याप्तं स्मृतिलक्षणम् । अथ सापेक्षज्ञानं स्मृतिरिति चेत् न, क्व चेयं सापेक्षता न तावत्स्वोत्पत्तौ, अनुमानस्यापि स्मृतित्वापातात् नापि

परिच्छेदे, परिच्छेदानिरूपणात्। न हि ज्ञानजन्यः परिच्छेदेऽन्यो विद्यते। न च व्यवहारः परिच्छेदस्तत्रापेक्षासम्भवात्। न हि ज्ञानं जनित्वा स्वकार्याय ज्ञानान्तरमपेक्षते, अथ ज्ञानान्तरेण विदिततया वेदनस्वभावत्वं सापेक्षत्वं, तच्चात्मनि स्वरूपे च नास्तीति नातिव्याप्तिरिति चेन्मैवं स्मृतिप्रमोषपदार्थसंज्ञादिस्मृतिषु विदिततया वेदनासंभवात्।

अथ स्मृतिप्रमोषादौ विदिततया वेदनाभावेऽपि संस्कारजत्वात् तत्स्वभावत्वं निश्चीयतेऽन्यत्र संस्कारजेषु तथाविधस्वभावदर्शनात् अतस्तत्स्वभावत्वमेव सापेक्षत्वं तस्मान्नाव्याप्त्यतिव्याप्ती इति चेन्न; संस्कारजज्ञानानां विदिततया वेदनत्वस्य दुरध्यवसानत्वात् पूर्वमर्थानुभवसमये वेदनस्यापि विदितत्वात्प्रायेण सह दृष्टं सह स्मर्यत इति प्रायेण विदिततया स्मर्यतेऽर्थः नतु पुनः तत्स्वभावनियमोऽपरः कल्प्यः।

अथ विदितवेदनशक्तिनियमः सापेक्षत्वं, धारावाहिकबुद्धीनां विदितविषयत्वेऽपि करणनिरूपणेनाविदितवेदनसामर्थ्यमवसीयते स्मृतिप्रमोषादौ स्मृतित्वाङ्गीकारात् तत्रापि विदितवेदनस्वभावत्वं सिद्धमिति चेत्, न; अनुमानस्य नियमेन विदितविषयत्वात्तत्स्वभावनियतस्मृतित्वप्रसङ्गात्। अथ सामान्यतोदृष्टस्याधिकविषयत्वात् तत्सामग्रीजन्यत्वात् दृष्टानुमानस्यापि अधिकसामर्थ्यसम्भवान्न स्मृतित्वमिति चेदेवमपि ग्राहकांशस्य नियमेन गृहीतविषयत्वात् तत्स्वभावाध्यवसानात्स्मृतितापातः। तस्मान्न स्मृतिलक्षणं सिद्धम्।

अत्रोच्यते—विदिततया वेदनस्वभावत्वं सापेक्षत्वं तत्स्वभावत्वं च स्वध्यवसानं संस्कारमूलानुभवस्तु सकृदेवार्थं ज्ञानस्वरूपं च प्रकाशयन्नुभयस्मृत्यनुगुणमेकं संस्कारमारभते लाघवात्। सच संस्कारः स्वतो वेदनविशिष्टमर्थं स्मारयन् कदाचिदभिभवादर्थं सारयति न वेदनम्। तत्र प्रतिकार्यं शक्तिभेदादेका शक्तिरुद्भूता अपरा अभिभूता कल्प्यते न तु संयोगविभागशक्तिवदेकविधा तस्माद्विदिततया वेदनस्वभावत्वं स्मृतिलक्षणमुपपन्नम्। विदितवेदनशक्तिर्वा स्मृतिः। ग्राहकांशस्य च सर्वत्र साक्षात्त्वाविशेषात् विषयमात्र एव पारतन्त्र्यं कथ्यते। अथवा स्वहेतुसंस्कारजनकज्ञानसमानविषयत्वं स्मृतिलक्षणम्। तस्मात् स्मृतिव्यतिरिक्ता बुद्धिरनुभूतिरिति सिद्धम्।

तर्कज्ञानस्य स्मृतिव्यतिरिक्तत्वात् प्रमाणकोटिघटितत्वमेव। तस्मात्सिद्ध-मनुभूतिः प्रमाणमिति। साक्षात्प्रतीतिः प्रत्यक्षं किमिदं साक्षात्त्वं नाम अव्यवधानमिति ब्रूमः व्यवधानञ्चार्थान्तरज्ञानापेक्षा तच्चानुमानादिष्वस्तीत्यसाक्षात्त्वम्। नन्वेवं सादृश्यादिज्ञाने प्रतियोग्यर्थान्तरज्ञानापेक्षत्वादसाक्षात्त्वमिति चेत् मैवं वोचः। स्वविषयानन्तर्गतार्थान्तरज्ञानापेक्षाप्यवधिः विशिष्टज्ञाने विशेषण-मन्तर्गतमिति तज्ज्ञानापेक्षा नासाक्षात्त्वमावक्ष्यति।

नन्वेवमनुमानज्ञानस्य तादृशज्ञानापेक्षत्वात् स्वरूपग्राहकांशयोरप्यसा-क्षात्त्वं स्यात्। न च विषयांशेऽपेक्षा न स्वांश इति वाच्यं, विशेषाभावात्। अतो नेदं लक्षणमिति चेन्न। स्वविषयानन्तर्गतप्रकाशमानसम्बन्धिरूपार्थान्त-रज्ञानापेक्षत्वं व्यवधानं सम्बन्धश्चात्र बोध्यबोधकभावः। न च ज्ञानांशे ग्राहकांशे च प्रकाशमानसम्बन्धिरूपार्थान्तरज्ञानापेक्षा। अतो नातिप्रसङ्गः। अथवा परोक्षप्रकाशः साक्षात्त्वं, परोक्षत्वञ्चातीन्द्रियज्ञानकर्मत्वं, ज्ञानसाधन-ज्ञाप्यत्वं वा, संस्कारस्याज्ञातत्वेऽपि प्रमितिविशेषणाद्व्यावृत्तिसिद्धिः।

अथवा स्वरूपभानं साक्षात्त्वं स्वरूपभानञ्चातिरोहितस्वलक्षणभानं, देश-कालस्वभावविप्रकर्षस्तिरोधानम्। अथवाऽतिरोधानञ्चासम्बन्धिरूपस्य प्रमाण-सम्बन्धितारूपेण भानम्। अथवा सम्बन्धिरूपस्य सम्बन्ध्यन्तररूपेण भानं तिरोधानं, धूमविकल्पके पररूपवद्धूमसम्बन्धाग्न्यादिभानेऽपि स्वरूपग्राही-[1]न्द्रियवृत्तेः स्वरूपेणापि भानमस्तीति नाव्याप्तिदोषः न हि विकल्पस्वरूपं तिरोदधातीति।

किञ्च तत्र विशिष्टप्रतीतिरेव न परप्रमाणसम्बन्धिप्रतीतिः, अनुमानादौ न निजरूपेण भानं किन्तु लिङ्गादिप्रमापकपरसम्बन्धितारूपेण भानमिति न साक्षात्त्वं, सर्वत्र ज्ञानग्राहकांशयोर्निजरूपेण भानात्साक्षात्त्वम्। अथवा स्वलक्षणप्रधानसंपृक्तिः साक्षात्त्वं अपर्यवसानलब्धस्वलक्षणोपसर्जनसाधारणा-कारप्रतिपत्तिः परोक्षत्वं, विषयासंवित्तिर्न स्वलक्षणप्रधाना। तस्मात्सिद्धं साक्षा-त्प्रतीतिः प्रत्यक्षमिति।

"संयोगस्त्रिविधो दृष्टो वैभवेनैव संभवी।
मनसः सति नित्यत्वे त्वात्मसंयोगतोऽणुतः" ॥ ५४ ॥

अत्र केचिन्मनसः वैभवमनुमानैः साधयन्ति—

मनो विभु स्पर्शानर्हद्रव्यत्वादारभ्यारम्भकभावरहितद्रव्यत्वात् ज्ञाना-समवायिसंयोगाश्रयत्वात् आत्मवदिति तदयुक्तं, धर्मिग्राहकप्रमाणविरोधात् तथाहि—विवादाध्यासिता बुध्यादयः द्रव्यान्तरसंयोगासमवायिकारणकाः नित्यद्रव्यगतानित्यविशेषगुणत्वात् पार्थिवपरमाणुगतलौहित्यवत्। गुणनित्यत्वपक्षे बुद्ध्यादयो द्रव्यान्तरसंयोगाधीनसमवायाः नित्यद्रव्यगतानित्यसमवायविशेष-गुणत्वात् पार्थिवपरमाणुगतलौहित्यवत्। तच्च संयोगिद्रव्यं मनः। तच्च न सर्वगतं भवितुमर्हति सर्वगतत्व आत्मसंयोगासम्भवात्। संयोगः क्रियाजन्यो वा संयोगजो वा भवति न तावद्विभुत्वे मनसः आत्मना संयोगः सम्भवति उभयोरक्रियत्वात्। नापि संयोगजः अवयवाभावात्। अतो वैभवासंभवान्मूर्तमेव मनः। तदपि न मध्यमपरिमाणमारम्भकल्पनाप्रसङ्गात्। तस्मात् लाघवतर्कस-हायादनुमानादण्वेवाश्रीयते। न च पाकजत्वमुपाधिः। भूतविशेषाश्रितगुणत्व-प्रयुक्तत्वात्पाकजत्वस्य परत्वापरत्वयोः साध्यव्याप्त्यसंभवात्।

ननु दृष्टान्तबलेन क्लृप्तत्वेन चेन्द्रियाणां भूतत्वनियमाच्च पार्थिवाद्यणु-संयोग एव कल्प्यताम्। न च भूतसंयोगो ज्ञानासमवायिकारणं न भवति भूतसंयोगत्वात् घटसंयोगवदिति वाच्यम्। अस्पर्शसंयोगो ज्ञानासमवायी न भवति अस्पर्शसंयोगत्वादाकाशवदित्यपि प्रसङ्गात् इति न, क्लृप्तत्वाद्यसिध्देः।

किञ्चास्पर्शसंयोगनिषेधे भूतसंयोगनिषेधे च कार्यस्यावगतसंयोगकारणत्व-भङ्गप्रसङ्गादन्यतरदत्र बाध्यम्। तत्र को नु खलु निर्णय इति चेदुच्यते अत्रेयं स्थितिः—एककार्यसाधनतया कस्मिंश्चित् क्लृप्ते विजातीयकार्यान्तरसाधन-तया कस्मिंश्चित् कल्प्ये यत्र क्लृप्तकारणान्वयव्यतिरेकौ क्लृप्तौ भवतः तत्र क्लृप्तमेव कारणं लाघवात्कल्प्यते यत्रान्वयव्यतिरेकावपि कल्प्यौ तत्र न लाघवमस्तीति स्वरसावगत एव भेद इति स्थूलकार्यारम्भनियतपरमाण्वन्वय-व्यतिरेकयोरक्लृप्तत्वात् कारणान्तरमेव कल्प्यते। यत्त्विन्द्रियाणां भूतत्वनियम इति, तन्न भूतविशेषगुणग्राहित्वात् भौतिकत्वमिन्द्रियाणां मनसस्त्वभूतगुण-ग्राहित्वादभूतत्वमेव यद्यपि भूतसंयोगो दृष्टान्ते दृष्टस्तथापि न तस्य प्रयोजकत्वं अभूतसंयोगेऽप्यविरोधात् स्पर्शकार्यारम्भकत्वं स्पर्शवत्त्वे प्रमाणं तदभावाद स्पर्शमेव मनोऽनुमीयते।

ननु क्लृप्तत्वादन्वयतिरेकाभ्यां च शरीरसंयोग एव ज्ञानासमवायिकारणमस्तु माभूद्द्रव्यान्तरकल्पनेति, उच्यते सुखदुःखादिग्रहणं संयुक्तसमवायेन भवतीत्यात्मसंयोगिद्रव्यान्तरं सुखाद्युत्पत्तौ तद्ग्रहणे च व्याप्रियमाणमेकमेव लाघवात् कल्प्यते तस्याभूतगुणग्राहित्वेनात्मनोऽमूतत्वादिन्द्रियत्वे मूर्तिलक्षणं कथं मनसो मूर्तत्वं—उच्यते नैतन्मूर्तिलक्षणं किं तु असर्वगतद्रव्यपरिमाणं मूर्तिरिति मूर्तिलक्षणाङ्गीकारात्। एवं च मनसः क्षिप्रगतित्वादेव पादे मे वेदना शिरसि मे सुखमिति घटते। चक्षुरादिना बहुषु संयुक्तेषु तत्तदिन्द्रियभागेन मनस्संयोगक्रमेण बुद्धिक्रमोऽपि घटते। विभुत्वे युगपज्ज्ञानप्रसङ्गा[1]त् न च मनःप्रणिधानक्रमात् बोधक्रम इति वाच्यं तस्य दुर्निरूपत्वात्।

अथ स्मृतिक्रमवददृष्टवशात्क्रम इति चेन्न यावत्सम्भवं दृष्टस्याभ्यर्हितत्वान्मनस्संयुक्तेन्द्रियसंयोगिनः प्रत्यक्षत्वात[विभु]। (शरीरं न) मन इति केचिद्वदन्ति, तदपि चिन्त्यं विभुत्व आकाशादेरेव क्लृप्तान्वयव्यतिरेकस्याङ्गीकार्यत्वान्मनस्सिद्धिः न स्यात। तस्मादणुत्वेनैव मनसः सिद्धत्वाद्विभुत्वानुमानानां धर्मिग्राहकप्रमाणविरोधात न विभुत्वसिद्धिः। [2]यथा[दा] शरीरपरिच्छिन्नैका सुखव्यक्तिस्तदा सकलशरीरव्यापिसुखानुभव इति नानुपपन्नमणुत्वम्।

अप्राप्तप्राप्तिहीनत्वान्न संयुक्तं विभुद्वयम्।
तत्संयोगो हि मूर्तेषु दृष्टो न द्रव्यमात्रके ॥५५॥

(अत्रा)[नच अ]जसंयोगे अनुमानं प्रमाणं आकाशमात्मना संयोगानर्हमधिकं[अचल] द्रव्य(त्वं)[त्वात्] द्रव्यत्वस्य च प्रयोजकत्वेऽप्राप्तप्राप्तिलक्षणसंयोगः स्वभावो [3]भज्येत तस्य च क्रियासंयोगाधीनत्वञ्च हीयते।

ननु कारणाभावे कार्यत्वं हीयते न तु स्वरूपमितरथाऽप्य तैजसपरमाणुषु (भू)रूपानुमानमाकाशे महत्त्वानुमानञ्च न स्यात् तयोरपि कारणाभावात्। मैवम्। उपाध्यन्तरादर्शनादनन्यथासिद्धकार्यदर्शनाच्च तदनुमानं कार्यद्रव्यरूपान्यथानुपपत्त्या परमाणुषु रूपानुमानं महतः पर्वतादेरप्यधिकदेशव्याप्त्या चाकाशे महत्त्वानुमानं न चेहाजसंयोगमन्तरेणानुपपन्नमस्ति।

ननु कालसंयोग आत्मनो मानसप्रत्यक्षसिद्धः योऽहं पूर्वेद्युरासं सोऽहमिदानीमस्मीति। तन्न कालोपाधियोगादेवाहमस्मीति व्यवहारः न काल-

योगात्तस्मान्नाजसंयोगे प्रमाणमस्ति। न च नैरन्तर्यं सम्बन्धः न च तं विनानुपपन्नं तस्माद्विभुसंयोगे प्रमाणं नास्तीति सिद्धम्।

ननु घटादीनां विभुसंयोगे किं प्रमाणं? न तावत् प्रत्यक्षमाकाशादेरप्रत्यक्षत्वात्। नाप्यनुमानं उभयमूर्ताश्रितत्वनियमादिति चेत्। उच्यते परत्वापरत्वाभ्यां शरीरगतितद्विकार[1]दर्शनाग्न्यूर्ध्वज्वलनादीनां सम्भवार्थञ्च विभुसंयोगस्यावश्यंभावित्वादन्यतरमूर्ताश्रितस्वभावत्वं संयोगस्याश्रीयते तस्मान्नास्त्यजसंयोगे प्रमाणमिति सिद्धम्।

वृत्तिः पङ्कजशब्दस्य योगादेव तु युज्यते।
न रूढ्या सहिताद्रूढिर्नान्यत्रावृत्तिकारणम्॥ ५६॥

ननु पङ्कजशब्दस्य न योगमात्रं वृत्तिकारणं सौगन्धिकादिष्वपि प्रसङ्गात्। अथ तत्राप्रयोगादेव प्रयोग इति चेत्, न प्राचीनप्रयोगस्यैवोत्तरप्रयोगहेतुत्वे सर्वत्र रूढिशक्तिर्न प्राप्नोति। अथ सर्वत्र प्रयोगनिर्वाहार्थं रूढिशक्तिराश्रीयते तर्हि सर्वत्र प्रयोगनिर्वाहार्थमनुगतैव सामग्री वाच्या न योगमात्रात्तन्निर्वाह इति रूढिशक्तिरप्याश्रीयते—उच्यते किं रूढिशक्तिस्तामरसे वृत्त्यर्था वा उतान्यत्रावृत्त्यर्था वा। न तावदाद्यः पक्षः; योगशक्तेर्निरपेक्षाया एव विद्यमानत्वात्। नापि द्वितीयः; रूढिशक्तेरवृत्तिहेतुत्वाभावात्तस्मादन्यत्राप्रयोगार्थं प्रतिबन्धकल्पनैवोचिता अप्रयोगार्थं रूढिसाहित्यकल्पनायामपि योगशक्तेरन्यत्र निरपेक्षायाः क्लृप्तायाः सौगन्धिकादिषु प्रतिबन्धः कल्प्य इत्यवश्याभ्युपेयत्वात्कार्यानुगुण्याल्लाघवाच्च प्रतिबन्धकल्पनैवोचिता समुदायशक्तिकल्पनातो वरमेकावयवशक्तिप्रतिबन्धकल्पन.। प्रवृत्तिप्रतिबन्धपक्षे प्रतिबन्धशक्तिकल्पनया गौरवं स्यादितिचेत्, न; तवापि साम्यात्।

किञ्चावयवशक्त्योः सापेक्षत्वे क्लृप्तनिरपेक्षत्वबाधस्तत्कल्पनायाश्चातिगौरवमापद्यते। अथ तामरसजातिबोधार्थं रूढिशक्तिराश्रीये[2]त सा च जातिर्बोधितावयवार्थाभ्यां श्रुत्या सदा विशिष्टेति न कल्हारादिषु योगमात्रात्प्रयोगो भवतीति चेत्, न; कल्हारादिषु योगशक्तिप्रतिबन्धात्प्रयोगनियमेन तामरसजातिबोधोपपत्तेर्निरूढिकल्पना सम्भवति।

न चावयवार्थाभ्यां समुदायतच्छक्तिकल्पना सम्भवति। किञ्च योगशक्ते-रवैकल्प्ये किमिति सर्वत्र कार्यं न करोति वैकल्प्ये च तत एव प्रयोगोऽपत्ते-र्न रूढिकल्पना। नचावयवार्थाभ्यां समुदायार्थस्य जातेर्विशेष्यत्वं सम्भवति व्यभिचारात् व्यभिचारे च न तामरसमात्रं पङ्कजं स्यात्-न चैतदस्ति। तस्माद्योग-रूढिपक्षोऽनुपपन्नः। यत्राक्षादौ योगार्थविवक्षया जातिमात्रविवक्षया प्रयोगः तत्र रूढिरेव यत्रैकावयवार्थसम्भवेऽपि इतरावयवस्य शक्तिः कल्प्या तत्रापि रूढिरेव यथाऽहीनादौ। तस्माद्योगरूढिपक्षोऽनुपपन्न इति सिद्धम्।

नेत्राणि गोलकाद्देशात् निर्गत्यार्थं न गृह्णते।
इन्द्रियत्वाद्यथान्यानि तैजसान्यत एव नः॥ ५७॥
आधारयुक्तबोधित्वमनिर्गत्या निबन्धनम्।
नेत्राणि प्राप्यकारीणि बाह्येन्द्रियतयान्यवत्॥ ५८॥
गत्वा प्राप्यैव रूपार्थबोधित्वाद्दीपवत्तथा।
तैजसानि तथादर्शजलादौ प्रतिहत्य च॥ ५९॥
रूपार्थग्राहकत्वाच्च तद्वदेव तथा पुनः।
तेजोजातीयतुल्यार्थबोधित्वात्तद्वदेव हि॥ ६०॥
तैजसत्वमतः सिद्धं नेत्राणामनुमानतः।
तद्वदन्येन्द्रियाणाञ्च भूतवैशेषिकस्य हि॥ ६१॥
गुणस्य ग्राहकत्वेन भौतिकत्वमतः स्थितम्।
मनसश्चाप्यभूतत्वं भूतवैशेषिकाग्रहात्॥ ६२॥
ऋजुदेशग्रहश्चैव दूरासन्नविशेषधीः।
तद्वृत्तेरप्रतीघातः स्वच्छद्रव्यजलादिभिः॥ ६३॥
तैजसत्वे तु नेत्राणामुपपन्नं भविष्यति।
अर्थस्याक्षेण सम्बन्धस्त्रिधा संपरिकीर्तितः॥ ६४॥
संयोगः समवायो वा संयुक्तसमवायता।
संयोगाद्गृह्यते द्रव्यं महत्स्पर्शवदेव च॥ ६५॥
श्रोत्रेण नभसा शब्दः समवायेन गृह्यते।
संयुक्तसमवायेन रूपादेस्तु ग्रहो मतः॥ ६६॥

गुरुत्वादृष्टसंस्कारबुद्धिवर्जगुणात्मनः ।
शक्तिवर्जस्य जात्यादेः समवायेतरस्य च ॥ ६७ ॥

गुणाद्याश्रितसंख्यादेः क्रियादेश्चानुमेयता ।
गुरुत्वसंस्कृतीनां च धर्माधर्मौ हि वैदिकौ ॥ ६८ ॥

संख्यादीनां गुणादेश्च भेदो रूपादिवृत्तिकः ।
संख्यासादृश्यशक्तीनां गुणादावपि दर्शनात् ॥ ६९ ॥

न च तद्बुद्धिबाधोऽस्ति येन शब्दोपचारता ।
कारणं समवायाख्यं रूपादौ च भविष्यति ॥ ७० ॥

समवायस्तु तच्छून्यो ह्यनवस्थाप्रसङ्गतः ।
तस्माद्रूपादिवृत्तित्वं संख्यादेरिति निश्चितम् ॥ ७१ ॥

**॥ इति भट्टविष्णुकृतौ नयतत्त्वसङ्ग्रहे प्रत्यक्षसूत्रं समाप्तम् ॥**

वृत्तिकारस्तु—

ज्ञानारूढं हि वेद्यं व्यभिचरति न धीः सर्वधीस्तेन सत्या
बाधाभावाद्विकल्पा व्यवहृतिमुखतोऽप्यत्र न भ्रान्तयस्ते ।
प्रत्यक्षास्तद्गुणाद्याः न बहिरबगतेः संविदाकारनिष्ठाः
तस्मात्प्रत्यक्षलक्ष्म प्रतिनियतमतश्चोदना सा प्रमाणम् ॥ ७२ ॥

यथार्था विमता बुद्धिः बुद्धित्वात् घटबुद्धिवत् ।
प्रमाणकारणाभावात् नायथार्था विरोधतः ॥ ७३ ॥

अत्र केचिदन्यथाख्यातिमाचख्युः, तदनुपपन्नम् ; स्वरूपनिरूपणाभावात्प्रतीतिपराहतत्वात्प्रमाणाभावात् कारणाभावादनिष्टप्रसङ्गाच्च नान्यथाख्यातिसम्भवः । तत्र न तावत्स्वरूपं निरूपयितुं शक्यते। अथात्रासतोऽन्यस्याकारेण भानमन्यथाभानमितिचेत्, न ; एवं तर्ह्यत्रासतो भानादसत्ख्यातिः स्यात् , अथ देशान्तरे कालान्तरे वाऽसतो भानान्नासत्ख्यातिप्रसङ्ग इति चेत् , एवं तर्हि देशान्तरीयं रजतं भासत इति नान्यथाख्यातिरपि स्यात् । अन्यत्र सदपि रजतमिदमात्मना भातीति चेत् ऐदमात्म्यं तर्हि सर्वत्रासदिति नासद्भानान्मुक्तिः । ऐदमात्म्यमिदं रजतस्वरूपं चेन्नान्यथाख्यातिसिद्धिः । अतिरिक्तं चेदसत्ख्यातिदोषः। अथैदमात्म्यमात्रमसदेवावभासत इति चेत् हन्त भोः किमपराद्धं रजतेन।

असदेव चेत् ज्ञानस्य विषयोऽसदित्येव भासेत। अथैकमेव पुरोवर्ति [1]सदिदं रजताकारस्य विषय इति नासद्विषयत्वमिति चेत्, किमिदं तद्विषयत्वादन्यत् ज्ञानस्य रजताकारत्वं? अथ रजतव्यवहारानुगुणप्राकट्यजनकत्वं रजताकारत्वं प्राकट्याश्रयो विषय इति रजताकारत्वं पुरोवर्ति सद्वस्तुविषयत्वञ्चाविरुद्धमिति चेत्, मैवं, यद्वतं हि यत्प्राकट्यं तत् तद्व्यवहारानुगुणं भवति, तत्प्राकट्याश्रय एव विषयः स एव निरूपकत्वादाकार इति वाच्यं, तथा च सत्यप्रतीयमानं सद्विषयो न भवति। त्रैकाल्यसतो विषयत्वे तस्यैव प्राकट्याश्रयत्वं वाच्यम्, तच्चानुपपन्नं अन्याश्रयस्य तत्प्रकाशत्वे सर्वत्र तथा स्यात्, तस्माद्दुर्निरूपमन्यथाभानम्।

किञ्च प्रतीतिपराहतश्चान्यथाभानमस्या बुद्धेरयं विषय इत्ययमर्थः [3]प्रतिभासाक्षिकः यस्यां बुद्धौ योऽर्थोऽवभासते स तस्या विषयः नास्य[2] इतीयं विषयाविषयव्यवस्था नान्या काचिदस्ति।

न च व्यवहाराश्रयस्य विषयत्वमतिप्रसङ्गात्तस्मात्प्रकाशमानस्याविषयत्वमप्रकाशमानस्य विषयत्वं वदतः प्रतीतिपराहतिः स्यात्। न च प्राकट्याश्रयो विषयः तस्य पुरोवर्तिद्रव्यमाश्रय इति वाच्यम्। यतः प्रतिभासबलेन प्राकट्याश्रयो विषयोऽवसीयते रजतप्रतिभासने हि रजतमेव प्राकट्याश्रयो न तु शुक्तित्वं तस्य स्फुरणान्नापीदमिदं प्रकाशेन पर्यायत्वप्रसङ्गात्। नापि तादात्म्यं तस्यासतोऽस्फुरणात्। अत्यन्तासत आश्रयत्वं वदता आश्रयो नास्तीत्युक्तं स्यात्। तस्मादस्तीति प्रकाशोऽसतो विषयत्वे प्रतीतिपराहतिः सिद्धैव।

किञ्चान्यस्यान्यथाभाने प्रमाणं नास्ति। ननु रजतार्थिप्रवृत्तिरन्यथानुपपद्यमाना पुरोवर्तिविषयं रजतज्ञानं कल्पयतीति चेत्, मैवम्; अन्यथोपपन्नत्वाद्भेदाग्रहणादपि प्रवृत्तिरुपपद्यते तथा हि शुक्तिद्रव्यग्रहणे शुक्तित्वादयो रजताद्भेदका मनोदोषान्न गृहीताः अनन्तरं च रजते तदंशरहिता स्मृतिरूपा जायते। तत्रागृहीतभेदेदंरजतप्रतिभासात् सत्येदंरजतप्रतिभासतुल्यत्वात्[3] रजतार्थिप्रवृत्तिरुपपद्यते। इयांस्तु भेदः सत्यरजते भेदाभावात् भेदाग्रह इह दोषाद्भेदाग्रहः तत्र भेदग्रहाद्रजतार्थी निवर्तते। अथ मतं यदि भेदग्रहान्निवृत्तिः तदा सत्यरजतज्ञाने भ्रान्त्या यत्र नेदं रजतमिति निवृत्तिः तत्र चेत्

भेदग्रहः अन्यथाभानमायातं, अविद्यमानस्य भेदस्य ग्रहात्। अथ तत्र भेदाग्रहो निवृत्तिकारणं हन्त तर्हि भेदाग्रहः प्रवृत्तिकारणं निवृत्तिकारणञ्चेति युगपत्प्रवृत्तिनिवृत्ती स्याताम्। अथा(भेदाग्रहा)[य]त सत्यरजतान्निवृत्तिस्तर्हि मिथ्यारजतादपि प्रवृत्तिसमयेऽपि निवृत्तिप्रसङ्गः भेदाग्रहेऽ[1]प्यभेदाग्रहस्य विद्यमानत्वात्, अथेष्टभेदाग्रहात् प्रवृत्तिः अनिष्टभेदाग्रहान्निवृत्तिरिति चेत्, तन्न अनिष्टशुक्तिभेदाग्रहसमयेऽपि सत्यरजते भ्रान्तस्येष्टरजतभेदाग्रहस्य विद्यमानत्वात्प्रवृत्तिनिवृत्तिप्रसङ्गात्। अथ तत्र भेदं स्मृत्वा तद्भेदाग्रहान्निवृत्तिरिति चेन्न अभेदग्रहस्यापि तादवस्थ्याद्रजताभेदग्रहात्प्रवृत्तिरपि स्यात्।

अथैवं मतं न शुक्तिव्यक्तिरजतव्यक्त्योर्भेदाग्रहात् प्रवृत्तिः अपितु शुक्तिव्यक्तिरजतजात्योः, शुक्तिव्यक्तिरपि निजरूपरूपितया न प्रतीयते रजतजातिरपि निजरूपरू(प)[पि]तया न प्रतीयते एवमगृहीतभेदयोः रूपरूपिणोः निरन्तरभानात्प्रवृत्तिः अन्तरितभानान्निवृत्तिरिति चेत्, तदप्यसुन्दरम्।

किं अर्थनैरन्तर्यभानं प्रवृत्तिहेतुः आहोस्वित् प्रतिपत्तिनैरन्तर्यं, न तावदाद्यः पक्षः; मिथ्यारजतेऽर्थे नैरन्तर्याभावात्। नापि द्वितीयः पक्षः; गवाश्वौ शुक्तिरजते इत्यत्रासजातीयरूपान्तरस्य भानान्निवृत्तिप्रङ्गात्। तथाहि गवार्थी रजतार्थी च गवि रजते वा नियोगतः न [2](प्रवृत्तेवा) [प्रवर्तते] तन्निरन्तरभानस्यान्येनाप्यविशिष्टत्वात्। पूर्वापरदेशसंबन्धितया प्रकाशमानौ गवाश्वाकारौ तथा प्रतीताभ्यामेव व्यक्तिभ्यां सम्बध्येते इति न व्यतिकर इति चेत्, मैवं वोचः; देशेना(ध्या)[प्या]कारस्य संयोगसमवाययोरनभ्युपगतत्वात् सम्बन्धो न प्रतीयते। सम्बन्धप्रतीतावपि सम्बन्धसम्बन्धिनोः नैरन्तर्यप्रतिभास[3]सम्बन्धिव्यवहारहेतुः। स च नैरन्तर्यप्रतिभास आकारद्वयस्याकारिणोश्च देशयोश्च सम्बन्धयोश्चाविशिष्ट इति पूर्ववद्गवाश्वादौ साङ्कर्यप्रसङ्गः। अथ यत्र विषयोऽस्ति तत्र तदर्थी प्रवर्तेत इति चेत्, हन्त तर्हि रजतार्थी न शुक्तिकायां प्रवर्तेत तस्मान्न निरन्तरभानं प्रवृत्तिहेतुः।

अत्रोच्यते—रूपप्रयुक्तकार्यार्थी रूपावच्छिन्नरूपिणि चेष्टते सत्यमिथ्यात्वसाधारणगतिस्त्वियं रजतविशिष्टेदंभानादेव समीचीनरजतेऽपि प्रवृत्तिस्तन्मिथ्यारजतेऽपि समानम्। न च परकीयाकारविशिष्टत्वादन्यथाख्यातिप्रसङ्ग इति

वाच्यम्; यतो विशिष्टत्वं नाम न वस्तुधर्मः प्रतिपत्तिधर्मोह्यसौ प्रतिपत्तिसमये वा पदार्थावस्थाभेदस्तथाहि आकारो हि परतन्त्रः परान्तर्भावघटितमूर्तिः कस्यचित् द्रव्यस्य विशेषणस्वभावः द्रव्यमपि स्वतन्त्रं केनचिदाकारेणाकारितया विशेष्यतया प्रतीयते। एवञ्च तयोराकाराकारिणोः गुणप्रधानभूतयोः साकाङ्क्षयोर्निरन्तरं प्रतीतयोर्विशेषणविशेष्यत्वेनावस्थानं भवति। विशेषणत्वं नामावच्छेदकत्वं भेदकत्वमिति यावत्। विशिष्टिर्भेदः स च बुद्धिभेदः तद्विषयत्वं विशेष्यत्वं आकाराकारिणो[1]रपीतराकारिभ्य इतराकारेभ्य आत्मना अवच्छिद्यैकव्यवहार-सामग्रीभूतो[2] गुणप्रधानभावेनावतिष्ठेते। अयं तयोरेकस्वभावः द्वितीयोऽपि स्वभावोऽस्ति ययोरेव समवायः तावेव स्वतो विशिष्टत्वं भजेते इति समवाय-स्वभावोऽसौ परतो दोषवशात्तत्स्वभावप्रतिबन्धादन्यथात्वमिति। अत एव गवाश्वादिषु बहूनां नैरन्तर्येऽपि दोषाभावे समवायस्वभावाज्जातिस्वभावाद्वा समवायिनोरेव विशिष्टत्वं तत्रापि यदि दोषः स्यात् स्याद्व्यतिकरः तस्मा-न्निरन्तरभानं विशिष्टप्रतीतिमुखेन प्रवृत्तिहेतुरिति युक्तम्।

नन्वेकप्रतीतिसिद्धयोः विशेषणविशेष्यत्वं कथमत्र प्रतीतिभेदे युज्यते? मैवम्,—अवश्यमेकप्रतीतिसिद्धयोः विशिष्टत्वमिति नायं नियमः प्रतीतिभेदेऽपि विशिष्टत्वमस्त्येव। मावाभूत् प्रतीतिभेदः तथापि नास्मद्राद्धान्तहानिः।

ननु विशिष्टप्रत्ययस्तादात्म्यबोध इति चेत्, मैवम्; अतादात्म्यविषयेऽपि गोसदृशो गवयः कुण्ठितः कुठारस्तीक्ष्णश्चेत्यादौ लोके वेदे च रथन्तरसामादौ विशिष्टप्रत्ययो बहुलमुपलभ्यते तस्मान्न किञ्चिदनुपपन्नम्। विशिष्टप्रतीतिप्रहाणेन विशिष्टान्तरप्रत्यये च निवृत्तिर्भवति। तत्रैव बाधकव्यवहारोऽपि भवति। बाधार्हविशिष्टप्रत्ययस्य भ्रान्तित्वमतथाभूतस्य सत्यत्वं समवायलिङ्गत्वञ्चेति सर्वमुपपन्नम्। तस्मादर्थापत्तेरन्यथोपपन्नत्वान्न प्रमाणता सम्भवति।

ननु कथमिदमेव रजतमिति सामानाधिकरण्यप्रतीतेः निर्वाहः? उच्यते आकाराकारिणोरिदमेव सामानाधिकरण्यं यदाकारपर्यवसिते द्रव्य आकारबुद्धि-विषयत्वमिति न पुनरेकविषयत्वं धारावाहिकत्वप्रसङ्गात्। नापि तादात्म्यमिदमेव रजतमन्यच्चैकमनेकञ्चेति प्रतीतिप्रसङ्गात्। तस्मादुक्तदिशा सामानाधिकरण्यमुप-पद्यते अपर्यवसानञ्च तत्क्षणेऽनन्तरक्षणे वा रूपिबुद्धिनियमः। अतः सर्वमुपपद्यते।

ननु विवादाध्यासिता प्रवृत्तिः पुरोवर्तिविषयरजतज्ञानपूर्विका रजतेच्छाधीनपुरोवर्तिप्रवृत्तित्वात् समीचीनप्रवृत्तिवत्। न च साधनप्रवृत्तौ व्यभिचारः साधनेच्छाधीनत्वात्साधनप्रवृत्तेः । मैवं । पुरोवर्तिव्यक्तिविषयत्वे साध्ये साध्यवैकल्यं; पुरोवर्तिजातिविषयत्वे बाधितविषयत्वम्। किञ्च समीचीनरजतविषयत्वस्यापि साधनाद्विशेषविरोधः प्रकरणसमत्वं च स्यात्।

नन्वयोगान्ययोगव्यवच्छेदपूर्वकत्वाद्विशिष्टज्ञानस्य तद्व्यवच्छेदस्यासतः प्रतिभासेऽन्यथाख्यातिदोषः। न, विशिष्टज्ञानस्य न व्यवच्छेदकपूर्वकत्वं फलभूतो हि सः न हि घटेनावच्छिन्नेच्छा इतरव्यवच्छेदपूर्विका।

किञ्च परस्यापि विशिष्टत्वमुक्तप्रकारमेवाङ्गीकार्यं कदाचित्कस्यचिद्विशेष्यत्वाद्विशेषणत्वाच्च। ननु रजतनिरूप्यत्वस्य पुरोवर्तिन्यसत्वात्तद्भानमन्यथाभानं स्यात्। तन्न। तन्निरूप्यत्वं निरूपणरूपबुद्धिधर्मः न वस्तुधर्मः सहप्रतीतावित्यत्र सहत्ववद्वस्तुधर्मत्वेऽप्याकार्यन्तरस्याकारान्तरनिरूप्यत्वदर्शनादस्यैवाकारस्याकार्यन्तरनिरूपकत्वदर्शनादाकार्याकारमात्रधर्मोऽयं निश्चीयते। तेन रजताकारनिरूप्यत्वं पुरोवर्तिनो न विरुद्धम्। किञ्च निरूपकाधीननिरूपणाख्यविलक्षणबुद्धिबोध्यत्वं निरूप्यत्वं तदेव विशेष्यत्वम्। किञ्च रूपाधीननिरूपणाह्वयपरप्रावण्यधीवेद्यतावैशिष्ट्यं क्वचिदेव कस्यचिदिदं पुंसः प्रवृत्त्यावहं रूपम्। तन्नियमेन रूपकतया कस्यापि यद्भासते रूपस्याप्यवबोधकेन नियतं रूपी चकास्ति स्वतः।

"प्राधान्येन गुणत्वेन वस्तु गृह्णाति धीः सदा।
क्रियान्वयदशाधर्मः प्राधान्यादिः सहत्ववत्॥ ७४॥

किञ्च क्लृप्तकारणाभावादपि नान्यथाभानं, दोषाणां कार्यविघातकत्वकृतमेव दोषत्वं न कार्यान्तरजनकत्वकृतं यत्र वेत्रबीजादेः दग्धस्य शक्त्यन्तरेण कदल्यङ्कुरजनकत्वं तत्रापि वेत्राजन्मनि दाहस्य दोषत्वं न कदलीजन्मनि।

नचैवमिहापि दोषाणां कारणत्वं कल्प्यत इति वाच्यम्; क्लृप्तयैव शक्त्योपपन्नत्वान्नकल्पनावकल्पते। किञ्चानिष्टं चापद्यते ज्ञानञ्चेत् व्यभिचरति सर्वत्रानाश्वासः स्यात्। अग्रहणशङ्का ज्ञातांशस्य सत्यत्वे सुपरिहरा भवति। ज्ञानस्यायथार्थत्वे तु विश्वासः किन्निबन्धनो भवति।

किञ्च प्रतीयमानाकारस्यार्थैर्विद्यमानत्वात् ज्ञान एव पर्यवसानात् साकारं विज्ञानमापतेत् देशान्तरीयरजताकारस्य च तादात्म्याकारस्य चेदमाकारस्य च प्रतिभासो न सम्भवतीति परस्तादुपन्यस्तं तस्मादयथार्थज्ञानं नास्ति सन्देहज्ञानञ्च नास्तीति। अथवा परविशेषणत्वेन परविशेष्यत्वेन चागृहीतभेदयोः रूपरूपिणोः निरन्तरभानात् प्रवृत्तिः गवाश्वादिषु तु दोषाभावात्स्वभावाप्रतिबन्धात् समवायिनोरेव विशिष्टत्वान्न व्यतिकरः अन्तरितभानान्निवृत्तिः। एवमन्यथासिद्धिरस्तु, न हानिः। अतः सिद्धं सर्वज्ञानानां यथार्थत्वम्।

ननु केयमन्तरितभानान्निवृत्तिः? उच्यते; विशिष्टप्रत्ययान्तरोदयाद्वा पूर्वविशिष्टप्रत्ययविनाशाद्वा तत्र निवृत्तिर्भवति मिथ्यारजते विशिष्टप्रत्ययान्तरोदयः समीचीने विशिष्टविनाशः तस्मादन्यथोपपन्ना प्रवृत्तिः। एतेनेदं निरस्तं। यदाहुः-विवेकाग्रहात्प्रवृत्तौ प्रयोज्यवृद्धप्रवृत्तावन्वयज्ञानानुमानं न सम्भवतीति नान्विताभिधानं सम्भवतीति शाब्दं प्रमाणमुच्छिद्येतेति। यतो दोषाभावे सम्यग्ज्ञानानुमानवत् प्रवृत्तितो विशिष्टज्ञानमेवानुमीयत इत्यन्वयज्ञानानुमानाच्छाब्दप्रमाणसम्भव इति। अनुमानज्ञानमपि न स्मृतिप्रमोषः बाधकारणदोषाभावात् अतो न काचिदनुपपत्तिः।

किञ्च न तादात्म्यज्ञानात्प्रवृत्तिरेकरूपायाः प्रवृत्तेरेकमेव कारणं वाच्यं न च विषयैक्यादृते ज्ञानैक्यं सम्भवति। न च सम्यग्रजतज्ञाने मिथ्यारजतज्ञाने च विषयैक्यमस्ति वस्तुतो रजततादात्म्याभावात्। न च प्रकाशैक्यं सम्भवति आश्रयैक्याधीनत्वात्तदैक्यस्य तस्मान्न तादात्म्यज्ञानात् प्रवृत्तिः।

किञ्च अभेदप्रतिभासवद्भेदप्रतिभासस्यापि तदैव विद्यमानत्वाद्युगपत् प्रवृत्तिनिवृत्ती स्याताम्। किञ्च रजततादात्म्याद्रजत एव प्रवर्तेत तस्मादन्यथाख्यातिर्न सम्भवतीति सिद्धम्।

## ॥ सत्ताजातिनिराकरणवादः ॥

सदिति व्यवहारस्य स्वरूपप्रमितिक्रिया।
कारणं तत्स्वरूपं तु सत्वं तत्सर्वसम्मतम् ॥ ७५ ॥

अत्र केचित् द्रव्यगुणादिषु अनुवर्तमानं महासामान्यं सत्ताख्यं सङ्गिरन्ते। तदयुक्तम्—द्रव्यादिस्वरूपातिरेकिणोऽनुवर्तमानस्याप्रतीतेः यदि परं सत्सदिति

शब्दप्रयोगोऽनुवर्तते स च प्रमितिक्रियासम्बन्धयोग्यतानिबन्धनः पाचकादिशब्दवदुपपद्यते ।

ननु प्रमाणसम्बन्धयोग्यतया भूते भविष्यति वा वर्षादौ सम्भवात् सदिति व्यवहारः स्यात् । अथासिधातुप्रयोगोपाधिरयं प्रमाणसम्बन्धः भूतादिकालसम्बन्धः आसीदस्ति भविष्यतीति[1]चेत्, मैवं; सत्ताभा(वे)[ने]केचित्कालसम्बन्धा वर्तन्ते केचिद्भूताः केचिदनागताः इति व्यवस्था किन्निबन्धना, सत्तावादिनो मते येषां सत्तातादात्म्यं ते सन्तः येषां न तादात्म्यं न ते सन्त इति व्यवस्थास्ति । अथ कालसम्बन्धस्य स्वरूपं वर्तमानता तदभावोऽवर्तमानता । अथवा स्वरूपवत्त्वमेव प्रमाणसम्बन्धयोग्यता स्वरूपवत्त्वञ्चातीतादेर्नास्तीति नातिव्याप्तिरिति चेत , न;स्वरूपवत्वानिरूपणात् । अथ सत्तावादिनोऽपि स्वरूपवत्त्वमङ्गीकरणीयमितरथा सामान्यस्य नित्यत्वात्किन्निबन्धनः त्रैकाल्यव्यवहारः ।

अथ व्यक्तितादात्म्यस्य कादाचित्कत्वात्तन्निबन्धनं त्रैकाल्यमिति चेत्, न; कोऽयं सत्तातादात्म्यस्य कदाचिद्भावः ? पदार्थानां तादात्म्यस्य च भावावस्था काचित् विद्यत इति चेत् हन्त नर्हि ! तदेव स्वरूपवत्त्वं स एवास्तिबु द्धेर्विषयः । तत्रैवैकं प्रमाणसम्बन्धमुपाधिमादाय स्वरूपाणां भिन्नत्वेऽपि सत्सदिति शब्दः प्रवर्तते कालसम्बन्धं वा । तत्र पदार्थानां स्वरूपवत्त्वस्य च।भेदेऽपि काल्पनिकभेदापेक्ष उपाधिवाच्यर्थव्यवहारः घटस्य भाव इतिवत् ।

ननु प्रमाणसम्बन्धाधीने सच्छब्देऽतिप्रसङ्गः स्यात् । स्वरूपविशेषिते सम्बन्धाधीने स्वरूपाणामेकाकाराभावे आनन्त्यव्यभिचारौ दुर्वारौ । उच्यते प्रकाशमानाकारभावावस्थास्वरूपवत्त्वं सा प्रमित्या विशेषितैकैव सच्छब्दप्रयोगनिबन्धनस्य सत्त्वे ममापि समानं, तवापि प्रकाशमानाकारभावावस्थास्वरूपवत्त्वं तदेव च सत्त्वमिति सिद्धं तस्मा[2]न्मुधाङ्गीकार इति चेत्, मैवं; स्यादेतदेवं यदि प्रमितिरेका भवेत् । साचातिभिन्ना कथमुपाधिरुच्यते । यद्यपि प्रमिति[ः] स्वरूपतो भिन्ना तथापि त्रितयप्रकाशस्य व्यवहारानुगुणत्वोपाधिनैकैव स्वरूपतो वा रूपादिवदभिन्ना समवायोत्पत्तेः क्षणिका । तस्मात् प्रमितिक्रियोपलक्षितं द्रव्यादिस्वरूपमेव सत्त्वं तत्स्वरूपानवगमात् सत्त्वसन्देहस्तदवगमे पश्चान्नसन्देहः । प्रमित्युपलक्षितद्रव्यादिस्वरूपेऽप्युत्पत्तेस्तत्स्वरूपग्रहादेव सच्छब्द-

प्रयोगः। न च प्रतियोगमुपाध्यपेक्षा यत्र प्रकाशमानभावः वर्तमानाकारः प्रमितिविषयो भवति तत्रास्तीति व्यवहारः। भविष्यति वृष्टिरित्यत्र न वृष्टिस्वरूपं प्रमाणविषयः किन्तु तस्य भविष्यत्त्वम्। आसीद्वृष्टिरित्यत्रापि न वर्षस्वरूपं प्रमा[1]विषयः किन्तु भूतत्वम्। भविष्यत्वं नाम वर्षापेक्षया वर्तमानकालोपाधेः पूर्वत्वं भूतत्वञ्च वर्षापेक्षयावर्तमानकालोपाधेः परत्वं भविष्यद्रूप[त्वरू]-पूर्वत्वं भूतत्वरूपपरत्वञ्च वस्तुधर्मोऽस्त्येव न तु भूतत्वं भविष्यत्त्वं च वृष्टिधर्मस्तस्यासत्त्वान्न धर्मः।

किञ्च भविष्यत्वस्यासद्रूपवर्षधर्मत्वे अनादिभावस्य नाशप्रसङ्गः भूतत्वस्याभिमतो भावस्यानन्तत्वं तस्मादुक्तलक्षणे एव भूतत्वभविष्यत्वे सिद्धे। वर्तमानत्वन्तु सार्वत्रिकाभावप्रतियोगित्वं तस्मात्सत्ताख्यं सामान्यं नास्तीति सिद्धम्।

॥ ब्राह्मण्यादिजातिनिराकरणम् ॥

श्रोत्रधीलक्षिता वर्णाः पञ्चाशन्मितिगोचराः।
व्यक्तयः शब्दशब्दस्य न सामान्यमबोधनात् ॥ ७६ ॥

भेदार्थप्रतिभासेऽपि यद्येकाकारबोधनम्।
तत्र जातिरुपेता स्यान्नैकशब्दप्रयोगतः ॥ ७७ ॥

तेन शब्दत्वविप्रत्वज्वालात्वाद्यानसन्दि[न्ति]नः।
यथावदनभिव्यक्तवर्णा एवाब्धिदुन्दुभौ ॥ ७८ ॥

अत एव च दूरादौ वर्णा दुन्दुभिवच्छ्रुताः।
लोकसिद्धवसिष्ठादिसन्तानजनिता नराः ॥ ७९ ॥

विप्रा न जातिरेतेषामुपनीत्याद्यधिक्रिया।
नचाक्षमन्यसापेक्षमीक्षते विप्रतां यथा ॥ ८० ॥

रत्नतत्त्वपरीक्षायां विलीनाज्यग्रहेऽपि च।
गन्धानुमेयमाज्यत्वं व्यावृत्तांशबुभुत्सया ॥ ८१ ॥

रत्नतत्त्वं परीक्षन्ते नात्रोपेक्षास्ति चक्षुषः।
तस्माद्[2]ब्रह्मण्यसामान्यं नैवास्तीति व्यवस्थितम् ॥ ८२ ॥

॥ भेदाभेदनिराकरणम् ॥

भिन्नाकारावबोधे तु यद्येकाकारबोधनम्।
एकद्विरवभासेन तादात्म्यं कीदृशं तयोः ॥ ८३ ॥

अत्र भेदाभेदवादिनः तत्र प्रत्यक्षं प्रमाणमाचक्षते। तदयुक्तम्। स्वरूपनिरूपणाभावात्, प्रमाणाभावाच्च। न तावत्स्वरूपनिरूपणसंभवः विलक्षणाकारबुद्धिबोध्यं भिन्नमित्युच्यते। एकाकारबुद्धिबोध्यमभिन्नमित्युच्यते। तत्र विलक्षणाकारानुभवसमये द्वावाकारावनुभूयेते एकाकारानुभवसमये एक आकारोऽनुभूयते तत्रैकस्य द्विरवभासः स्यात्। तृतीयाकारानुभवो वास्यात्, अथाकारद्वयमेकात्मतयानुभूयत इति चेत्, न; किमिदमैकात्म्यं नाम किमुभयसमवेतमेकत्वमुत द्वित्वाप्रतिपत्तिः न तावदाद्यः—नामान्तरेण समवायाङ्गीकारात्।

नापि द्वितीयः—तावता तादात्म्यासंभवात्। अथैवं मतम्। एकमेव वस्त्वनुवृत्तव्यावृत्ताकारबुद्धिबोध्यमनुवृत्ताकारबुद्धिबोध्यतया जातिरित्युच्यते। तदेव व्यावृत्तबुद्धिबोध्यतया व्यक्तिरित्युच्यते इदमेव भिन्नाभिन्नत्वमिति न पूर्वोक्तदोष इति चेत्, मैवम्; उभयाकारबुद्धिबोध्यतया उभयं वस्त्विति गम्यते बुध्द्याकारव्यवस्थाप्यत्वाद्वस्तुतत्त्वस्यैतयोराकारयोस्तादात्म्यमिति चेत्किमिदं तादात्म्यमेकाकारत्वमिति चेत्, न; पूर्वोक्तदोषानतिपातात्। न च विशिष्टत्वं तादात्म्यं निरूप्यनिरूपकभेदत्वात् विशिष्टत्वस्य। अथैकस्य वस्तुनोऽनुवृत्तिव्यावृत्ती तादात्म्यमिति चेत्, न; अनुवृत्तिव्यावृत्त्योर्वस्तुना सह पूर्ववदैकात्म्यबोधस्य दुर्घटत्वात्। तस्माद्दुर्निरूपं तादात्म्यम्।

नापि प्रमाणमस्ति। ननु प्रत्यक्षमस्ति प्रमाणं घटोऽयमित्यनुवृत्तव्या—वृत्ताकारबुद्धिवेद्यत्वाद्वस्तुनो भिन्नाभिन्नत्वं प्रतीयते न च विरोधः अन्यत्र सहादृष्टत्वेऽप्यत्र सहदृष्टत्वात्।

नचानुवृत्तिव्यावृत्त्योर्भावाभावात्मकत्वान्न प्रत्यक्षता इति वाच्यम्; वस्तुस्वरूपत्वात्तयोः। न च ते अपि भिन्ने एव, एकात्मकतयावभासात्, तस्मात्प्रत्यक्षमत्र प्रमाणमुच्यते। यदाकारस्यानुवृत्तिः तदाकारस्य न व्यावृत्तिः प्रतीयते। अनुवृत्तिव्यावृत्तिबुध्द्योर्भिन्नविषयत्वादेकविषयत्वे पर्यायत्वप्रसङ्गात्। भिन्नयोरप्येकत्वं प्रतीयत इति चेत्, न; एकस्य द्विरवभासादिप्रागुक्तदोषप्रसङ्गात्। अतो न प्रत्यक्षं प्रमाणम्।

नन्वत्यन्तभेदादत्यन्ताभेदाच्च व्यावर्तमानं सामानाधिकरण्यं प्रमाणमिति चेत्, न; आकाराकारिणोस्तत्सम्भवात्।

अत्रेयं स्थितिः—किञ्चित्परनिरूप्यस्वभाव[1]: यथेच्छादि, किञ्चित्परनिरूपकस्वभाव[2]: यथाकारः, तत्राकारबुद्धिरपर्यवसानादाकारिपर्यन्ता भवति। तत्राकारपर्यवसिते द्रव्य इदंबुद्धिश्चेद्भवति तत्रायमेव गौरिति सामानाधिकरण्यव्यवहारो भव(त)[ति] इत्युपपद्यते, न तु गोत्वाकार एव द्रव्यमिति सामानाधिकरण्यम्। तस्मान्न भेदाभेदे प्रमाणमस्ति।

परस्परविरोधाच्च न भेदाभेदसम्भवः[1] तथाहि—किं लोकसिद्धयोरेव भेदाभेदयोर्विलक्षणाकारैकाकारबुद्धिबोध्ययोरत्र समुच्चयोऽङ्गीक्रियते, उत तृतीयः प्रकारः। न तावत्तृतीयः; तस्यानिर्वचनीयप्रकारत्वात्। नापि प्रथमः परस्परविरोधितया प्रसिद्धस्वभावत्वात्। अन्यत्र विरोधित्वेऽप्यत्र सहदर्शनादविरोध इति चेत्, न; दृष्टत्वस्यैव निराकृतत्वात्।

अथाकारद्वयप्रतिभासो विलक्षणप्रतिभासो न भवति सदृशदर्शने किं तदेवेदमुतान्यदिति सन्देहानुपपत्तेः। अत्रैकाकारस्फुरणे द्व्याकारस्फुरणे च सन्देहो न स्यात्। मैवम्। एकाकारस्फुरणेऽपि विलक्षणाकारस्फुरणादगृहीतभेदात्सन्देहोपपत्तेः तव मते यथा तत्र सोऽन्यो वेति सन्देहः। एवमन्यत्रापि जातिव्यक्तिविषये सन्देहः स्यादन्यो वानन्यो वेति। तस्माद्भेदाभेदे प्रमाणं नास्तीति सिद्धम्।

॥ **समवायव्यवस्थापनम्** ॥

अप्रतीतान्तरालार्थविशेषणविशेष्यता।
सम्बन्धान्तरपूर्वत्वादृते न ह्युपपद्यते ॥ ८४ ॥

केचित्—इह गवि गोत्वमिति प्रत्यक्षं समवाये प्रमाणमाहुः; तदयुक्तं, इह गवि गोत्वमिति प्रत्यक्षाभावात् इन्द्रियसन्निकर्षाभावाच्च। न च सम्ब(न्ध)[द्ध] विशेषणत्वं सन्निकर्षः विशेषणविशेष्यत्वं प्रतीतिधर्मो न वस्तुधर्मः तथात्वे संयुक्तसमवायादि व्यर्थं स्यात् अतो न प्रत्यक्षं, नाप्यबाधितविशिष्टप्रत्ययत्वात् दण्डिप्रत्ययवत् सम्बन्धपूर्वक इत्यनुमानं प्रमाणम्; अनैकान्तिकत्वात्; घटशून्यं भूतलं घटो नास्ति घटः प्रकाशते घट उत्पद्यते समवेताविमौ घटेच्छेत्यादिभिः। न चात्र निरूप्यनिरूपकाख्यः सम्बन्धोऽस्तीति वाच्यम्; तत्प्रत्ययस्यैव विशिष्टप्रत्ययत्वात्। उच्यते—अन्तरालशून्यविशेषणविशेष्यप्रत्ययः सम्बन्धिन्येव दृष्टः

सम्बन्धं कल्पयति यथा घटाकाशादितच्छून्यत्वश्चाभिन्नदेशकालत्वम् । न च परतन्त्रस्वभावत्वादुपपन्न इति वाच्यम्; कस्यचित्केनचिद्विशेष्यत्वनियमासम्भवात् ।

ननु समवायस्य समवायिभ्यां सम्बन्धेऽनवस्थाप्रसङ्गात् असम्बन्ध समवेताविमौ अनयोः समवाय इति च न स्यात्, उच्यते—समवायो हि सम्बन्धरूपत्वादनपेक्ष्यैव सम्बन्धान्तरं सम्बन्धिनोः सम्बन्धिभ्याञ्चात्मसम्बन्धव्यवहारहेतुः यथा विषयविषयिभावस्तादात्म्यं वा । अथवा—शब्द इन्द्रियसम्बन्धः प्रत्यक्षत्वात् घटवद्रूपादयश्च प्रत्यक्षत्वादिन्द्रियसम्बन्धिनस्तत्र संयुक्तसमवायादृते सम्बन्धान्तरं नास्तीति समवायोऽङ्गीकर्तव्यः । स च सम्बन्धत्वान्न सम्बन्धान्तरमपेक्षते संयोगस्य सम्बन्धत्वेऽपि प्रमाणान्तरेण स्वविलक्षणसम्बन्धस्वीकारान्न दोषः । समवायोऽपि यद्यपि विजातीयं निरूप्यनिरूपकसम्बन्धं वैकहेतुत्वसम्बन्धं वा ऽपेक्षते, तथापि न दोषः मूलक्षयकरत्वाभावादनवस्थायामपि न दोषः तदुक्तं— "मूलक्षयकरीं प्राहुरनवस्थां च दूष(णी)[ण]म्" । इति । तस्मात्समवायः सिद्धः । स च कॢप्तपदार्थविलक्षणत्वात् पदार्थान्तरं सिद्धम् । अथ विशेषणविशेष्यभावः पृथक्सिद्धयोरेव सम्बन्धपूर्वको दृष्ट इति । इह पृथक्त्वाभावान्न सम्बन्धपूर्वकत्वमिति चेदपृथक्सिद्धयोरपि विशेषणविशेष्ययोः सम्बन्धे विरोधाभावात्पृथक्सिद्धविशेषणं व्यर्थम् । न च सकलसपक्षानुगतिमात्राद्विशेषविरोधो भवति साध्यव्यापकविशेषसाधनाक्षमो हि विशेषविरुद्धः । व्यापकत्वं च तस्य यद्विशेषस्यासिद्धौ साध्यानिर्वाहो भवति यथा शरीराद्यभावे कर्तृत्वाद्यनिर्वाहः इतरथाऽतिप्रसङ्गः स्यात् । स्व(वे)[चे]ष्टायां स्वहर्षे च स्वसमवेतप्रयत्नप्रियज्ञानकारणकत्वं दृष्टमिति परस्मिन् चेष्टादिदर्शनात् तदनुमानं विशेषविरुद्धं स्यात् । तस्मादयुतसिद्धयोरपि सम्बन्धाविरोधाद्विलक्षणसम्बन्धोऽङ्गीक्रियते, अभेद एव परं सम्बन्धो न भवति, अत एव तादात्म्ये विशेषणविशेष्यत्वानुपपत्तिः अभेदस्य तद्विरोधित्वाद् भेदेऽप्यसम्बन्धयोरदर्शनात् । तन्मते सम्बन्धाभावाद्विशिष्टत्वं न सम्भवति । न च तादात्म्यमेव विशिष्टत्वं, राजपुरुषः रथन्तरसामा क्रतुः घटेच्छा इत्यादेः सहस्रशो दर्शनादपि तद्विशेषा[1]नुरज्यानुरञ्जकभावोऽयुतसिद्धानां भवति । अतः सिद्धः समवायः ।

॥ इति नयतत्त्वसङ्ग्रहे वृत्तिकारग्रन्थः समाप्तः ॥

## ॥ निरालम्बनवादः ॥

स्वप्ने बाह्यं वस्तु नास्तीति कश्चि-
न्नीलाकारो वासनाधीनजन्मा ।
तद्वज्जाग्रत्प्रत्यये वासनातो
नीलाकारो लाघवादैकरूप्यात् ॥ ८५ ॥

मैवं बाह्यप्रत्ययाद्बाधहीना-
द्बाह्यास्तित्वं तत्प्रमोषेण जाता ।
स्वप्ने दृष्टानुस्मृतिर्बाधितत्वा-
त्तच्चादृष्टं भोगसिध्द्यै हि कॢप्तम् ॥ ८६ ॥

॥ इति निरालम्बनवादः समाप्तः ॥

## शून्यवादः ।

शून्यं तु :—

साकारा स्वप्रकाशा भवति निखिलधीर्निराकारभाना-
न्नीलाकारोऽस्ति बाह्यः सहमतिनियमान्नीलबुद्ध्योर्न भेदः ।
भानायोगाच्च जाड्यादपि च न घटते वित्तिवेद्यव्यवस्था
तस्माद्बाह्यार्थशून्याः सकलमतिभिदा ग्राहकग्राह्यरूपाः ॥ ८७ ॥

मैवं बुद्धेः स्वभानं ह्यभिमतमथ धीर्वित्तिरूपा चकास्ति
नीलाकारो हि वेद्यो बहिरवगमितस्तेन भेदस्तयोः स्यात् ।
अर्थो वेद्यो हि जाड्यात्सहमतिनियमान्नार्थवित्त्योरभेदः
स्वाभाव्याद्वित्तिवेद्यौ सहमतिनियतौ तेन बाह्यार्थसिद्धिः ॥ ८८ ॥

### ॥ संवित्स्वप्रकाशतानिरूपणम् ॥

संस्कारसहजन्मादिव्यवहारेऽन्यसंविदः ।
अनपेक्षां धियः प्राहुः पण्डिताः स्वप्रकाशताम् ॥ ८९ ॥

अत्र केचित् स्वयंप्रकाशत्वं दुर्निरूपं मन्यन्ते, तथाहि संवित् स्वयं प्रकाशते इत्यत्र न प्रकाशकर्मत्वं संविदः स्वात्मनि क्रियावृत्तिविरोधात् अनङ्गीकृतत्वाच्च। नापि कर्तृत्वं संविद्यतिरिक्तस्य प्रकाशार्थस्यानिरूपणात् ।

अथ यदर्थव्यवहारानुकूला[1] संवित् सोऽर्थ[2]व्यवहारानुकूलः प्रकाशते इत्युच्यते स्वस्मिन् स्वयमेव व्यवहारानुकूला संविदिति स्वयं प्रकाशत इत्युच्यत इति-तन्न; स्वव्यवहारे संविदः ज्ञानान्तरानपेक्षत्वं स्वप्रकाशत्वमित्युक्तं स्यात्, तत्र हानादेरसंभवाच्छब्दप्रयोग एव व्यवहारस्तत्र शब्दस्मरणादिज्ञानापेक्षत्वादसम्भवो लक्षणस्य स्यात्। अथ स्वसत्ताधीनव्यवहारत्वं स्वप्रकाशत्वमिति चेत्, न; अनेक-शब्दस्मरणाद्यपेक्षत्वाद्व्यवहारस्य। उच्यते—स्वव्यवहारे ज्ञानान्तरानपेक्षत्वं स्वप्रकाशत्वं व्यवहारश्च स्वस्मृतिहेतुसंस्कारः स्वविषयसुखदुःखेच्छाद्वेषप्रयत्नरूप आत्मधर्मोऽपि ज्ञानाधीनः, तत्र व्यवहार[3]विषये यथाज्ञानं करोति तथा स्वविषय-मपि व्यवहारं स्वोत्पत्त्यनन्तरं संविदन्तरमनपेक्ष्यैव करोति। शब्दप्रयोगेऽपितु शब्दस्मरणादिरेक एव व्यवहारस्तत्र यथा विषयज्ञानापेक्षा न तथा संविज्ज्ञाना-पेक्षा इति नासंभवदोषः।

ननु संस्कारोत्पत्त्यादि न व्यापीत्यव्यापि लक्षणमिति चेत्, न; सर्वज्ञानानां संस्काराधायकत्वात् कुतश्चिद्वैकल्यात् संस्कारानुत्पादकत्वेऽपि तत्स्वभावत्वं लक्षणमिति सिद्धं लक्षणम्।

किमत्र प्रमाणम्? न तावत् प्रकाशत्वाद्दीपवदित्यनुमानं दीपस्य प्रकाशत्वा-सिद्धेः। नापि यदव्यक्तप्रकाशं न तत्प्रकाशते यथा कुड्यस्थगितमिति। सन्दिग्धोपाधित्वात् किं प्रकाशाभावादव्यक्तत्वमुताव्यक्तप्रकाशत्वादिति सन्दि-ग्धोपाधिता।

